कर्नाटकप्रशासनम्

# संस्कृतरश्मिः-५

## तृतीयभाषा - संस्कृतम्

## दशमी कक्ष्या

(Revised)

## प्रथमः भागः

# 10

©KTBS NOT TO BE REPUBLISHED

# SAMSKRITHA RASHMI - 5

## TENTH STANDARD

## THIRD LANGUAGE - SANSKRIT

## PART-1

**KARNATAKA TEXTBOOK SOCIETY (R)**
6th Cross, Malleshwaram, Bengaluru-560 003.

# Preface

The Textbook Society, Karnataka has been engaged in producing new textbooks according to the new syllabi prepared which in turn are designed based on NCF – 2005 since June 2010. Textbooks are prepared in 11 languages; seven of them serve as the media of instruction. From standard 1 to 4 there is the EVS and $5^{th}$ to $10^{th}$ there are three core subjects namely mathematics, science and social science.

NCF – 2005 has a number of special features and they are:

- Connecting knowledge to life activities
- Learning to shift from rote methods
- Enriching the curriculum beyond textbooks
- Learning experiences for the construction of knowledge
- Making examinations flexible and integrating them with classroom experiences
- Caring concerns within the democratic policy of the country
- Make education relevant to the present and future needs.
- Softening the subject boundaries integrated knowledge and the joy of learning.
- The child is the constructor of knowledge

The new books are produced based on three fundamental approaches namely, Constructive approach, Spiral Approach and Integrated approach.

The learner is encouraged to think, engage in activities, masters skills and competencies. The materials presented in these books are integrated with values. The new books are not examination oriented in their nature. On the other hand they help the learner in the total development of his/her personality, thus help him/her become a healthy member of a healthy society and a productive citizen of this great country India.

@KTBS NOT TO BE REPUBLISHED

Language textbooks are designed to help learners master communicative competencies, excellent comprehension, meaningful expression and efficient reference skills.

Schools in Karnataka offer seven languages as media of instruction and eight as first languages and ten languages are offered as third language. The objective is to help the learners to use these languages efficiently at the communicative level. It is hoped that at least a cross section of learners achieve competencies to use these languages at the creative level.

Teachers are expected to adapt their teaching methods not to make these textbooks just feed materials for examinations, but help learners master language competencies such as communication, comprehension, expression in writing and necessary reference skills.

The Textbook Society expresses grateful thanks to the chairpersons, writers, scrutinisers, artists, staff of DIETs and CTEs and the members of the Editorial Board and printers in helping the Text Book Society in producing these textbooks.

@KTBS
NOT TO BE REPUBLISHED

**Nagendra Kumar**
Managing Director
Karnataka Textbook Society
Bengaluru, Karnataka.

**Prof. G.S. Mudambadithaya**
Co-ordinator
Curriculum Revision and
Textbook Preparation
Karnataka Textbook Society
Bengaluru, Karnataka.

## प्राक्कथनम्

संस्कृतभाषा अत्यन्तं सुन्दरभाषा ललिता भाषा मधुरा भाषा इति च प्रसिद्धा अस्ति। विश्वभाषासु संस्कृतम् एव प्राचीनभाषा। भारतीयसंस्कृतेः संरक्षणार्थं संस्कृतम् आवश्यकं वर्तते।

भाषायाः अधिगमः श्रवणभाषणपठनलेखनद्वारा भविष्यति इति भाषाविज्ञानिनः वदन्ति। अत एव शब्दरूपाणां क्रियापदरूपाणां सुभाषितानां च कण्ठपाठार्थम् अत्र अवकाशः दत्तः। शिक्षकाः कक्ष्यासु विद्यार्थिभिः मौखिकाभ्यासं कारयेयुः इति अस्माकम् अपेक्षा वर्तते।

2005 राष्ट्रियपाठ्यक्रमनियमानुसारं (NCF – 2005) पाठ्यपुस्तकमिदं विरचितम् अस्ति। अतः शिक्षकाः भाषायाः चतुरः अंशान् परिगणय्य छात्रान् बोधयन्तु इति आशास्महे।

पुस्तकरचनायां कृतसाहाय्येभ्यः कर्नाटकपठ्यपुस्तकसङ्घस्य अधिकारिभ्यः मुद्रणचित्रलेखनादिकार्येषु प्रत्यक्षपरोक्षरूपेण कृतभूरिपरिश्रमेभ्यः धन्यवादाः।

@KTBS NOT TO BE REPUBLISHED

**डा. एम्.के. श्रीधरः**
अध्यक्षः
पठ्यपुस्तकरचनासमितिः

### अध्यापकेभ्यः सूचनाः

1. शैक्षणिकवर्षादौ सप्ताहं यावत् पूर्वाधीतविषयाणां पुनस्स्मारणात्मकः सेतुपाठः भवेत्।
2. पूर्वकक्ष्यासु पाठिताः सुबन्ततिङन्तसम्बद्धाः अंशाः स्मारयितव्याः ।
3. ‘AdY`m{e…' "{H$`mH$bm{n…' "àh{bH$m' इति विभागतः परीक्षायां प्रश्नाः न भवेयुः।
4. कृपया आकरग्रन्थानां परिशीलनं कुर्युः।
5. गद्यपाठान्तर्गताः कण्ठपाठार्थं निर्दिष्टाश्च श्लोकाः तात्पर्यलेखनार्थं प्रश्नरूपेण न भवेयुः।
6. पूरकपाठेभ्यः दीर्घोत्तरप्रश्नाः एव परीक्षायां भवेयुः ।
7. पठ्यपुस्तकस्यादौ दत्तं स्तोत्रं छात्राणां गानार्थमेव न तु परीक्षार्थम्।

# पठ्यपुस्तकरचनासमितिः

**अध्यक्षः**

**डा. एम्.के. श्रीधरः**, कुलसचिवः, कर्नाटकसंस्कृतविश्वविद्यालयः, चामराजपेटे, बेङ्गलूरु।

**सदस्याः**

**श्रीमान् सूर्यप्रकाशः एम्.**, संस्कृताध्यापकः, के.वि.एस्.एम्. प्रौढशाला, काञ्चन पुत्तूरु, दक्षिणकन्नडम्।

**विद्वान् रुद्रेशय्य**, संस्कृताध्यापकः, श्रीनिर्वाणस्वामी वसतिप्रौढशाला, देगुलमठः, कनकपुरम् ।

**श्रीमती रङ्गनायकि एम्.एस्.**, निवृत्तोपन्यासिका, स.प.पू. विद्यालयः, बेङ्गलूरु ।

**श्रीमान् श्रीकान्त हेगडे**, सम्पादकः, विकिपीडिया विभागः, संस्कृतभारती, बेङ्गलूरु ।

**डा. सुमन् के.एस्.**, संस्कृतविभागाध्यक्षः, जैनमहाविद्यालयः, बेङ्गलूरु ।

**श्रीमान् रामचन्द्रराव् एम्.**, कलावित्, सर्वकारीयप्रौढशाला, नूतनकोटे, चामराजपेटे, बेङ्गलूरु।

**परिशीलकः**

**विद्वान् शङ्करभट्टः एम्.**, निवृत्तः संस्कृताध्यापकः, कुमारपार्क् प्रौढशाला, बेङ्गलूरु।

**अध्यापकसदस्यौ**

**डा. राघवेन्द्रभट्टः, क्यादगि**, संस्कृताध्यापकः, सर्वकारीयप्रौढशाला, सारक्कि, बेङ्गलूरु ।

**विद्वान् गुरुमूर्तिः जि.एम्.**, संस्कृताध्यापकः, पदवीपूर्वविद्यालयः, मल्लाडिहल्लि, होलल्केरे, चित्रदुर्गम्।

**सम्पादकौ**

**डा. कोटेमने रामचन्द्रभट्टः**, कुलपतिवर्यः, विवेकानन्दयोगविश्वविद्यालयः, जिगणि ।

**डा. श्रीनिवासः वरखेडि**, निकायप्रमुखः, कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु ।

**प्रमुखसंयोजकः**

**प्रो. जि.एस्. मुडम्बडित्तायः**, क.प.पु.सङ्घ रिः, बेङ्गलूरु ।

**मार्गदर्शकौ**

**श्रीमान् नागेन्द्रकुमारः**, व्यवस्थापकनिर्देशकः, क.प.पु.सङ्घःरि, बेङ्गलूरु ।

**श्रीमती सि. नागमणी**, उपनिदेशिका, क.प.पु.सङ्घःरि, बेङ्गलूरु।

**संयोजिका**

**श्रीमती एस्. एन्. लीलावती**, ज्येष्ठसहायकनिर्देशिका, क.प.पु.सङ्घःरि, बेङ्गलूरु ।

©KTBS NOT TO BE REPUBLISHED

# About the Revision of Textbooks

Honourable Chief Minister Sri Siddaramaiah who is also the Finance Minister of Karnataka, in his response to the public opinion about the new textbooks from standard I to X, announced, in his 2014-15 budget speech of constituting an expert-committee, to look into the matter. He also spoke of the basic expectations there in, which the textbook experts should follow: "The textbooks should aim at inculcating social equality, moral values, development of personality, scientific temper, critical acumen, secularism and the sense of national commitment", he said.

Later, for the revision of the textbooks from class I to X, the Department of Education constituted twenty seven committees and passed an order on 24-11-2014. The committees so constituted were subject and class-wise and were in accordance with the standards prescribed. Teachers who are experts in matters of subjects and syllabi were in the committees.

There were already many complaints, and analyses about the textbooks. So, a freehand was given in the order dated 24-11-2014 to the responsible committees to examine and review text and even to prepare new text and revise if necessary. Eventually, a new order was passed on 19-9-2015 which also gave freedom even to re-write the textbooks if necessary. In the same order, it was said that the completely revised textbooks could be put to force from 2017-18 instead of 2016-17.

Many self inspired individuals and institutions, listing out the wrong information and mistakes there in the text, had sent them to the Education Minister and to the Textbook Society. They were rectified. Before rectification we had exchanged ideas by arranging debates. Discussions had taken place with Primary and Secondary Education Teachers' Associations. Questionnaires were administered among teachers to pool up opinions. Separate meetings were held with teachers, subject inspectors and DIET Principals. Analytical opinions had been collected. To the subject experts of science, social science, mathematics and languages, textbooks were sent in advance and later meetings were held for discussions. Women associations and science related organisations were also invited for discussions. Thus, on the basis of inputs received from various sources, the textbooks have been revised where ever necessary.

@KTBS NOT TO BE REPUBLISHED

Another important aspect has to be shared here. We constituted three expert committees. They were constituted to make suggestions after making a comparative study of the texts of science, mathematics and social science subjects of central schools (NCERT), along with state textbooks. Thus, the state text books have been enriched based on the comparative analysis and suggestions made by the experts. The state textbooks have been guarded not to go lower in standards than the textbooks of central schools. Besides, these textbooks have been examined along side with the textbooks of Andhra Pradesh, Kerala, Tamil Nadu and Maharashtra states.

Another clarification has to be given here. Whatever we have done in the committees is only revision, it is not the total preparation of the textbooks. Therefore, the structure of the already prepared textbooks have in no way been affected or distorted. They have only been revised in the background of gender equality, regional representation, national integrity, equality and social harmony. While doing so, the curriculum frames of both central and state have not been transgressed. Besides, the aspirations of the constitution are incorporated carefully. Further, the reviews of the committees were once given to higher expert committees for examination and their opinions have been inculcated into the textbooks.

@KTBS
NOT TO BE REPUBLISHED

Finally, we express our grateful thanks to those who strived in all those 27 committees with complete dedication and also to those who served in higher committees. At the same time, we thank all the supervising officers of the Textbook Society, who sincerely worked hard in forming the committees and managed to see the task reach its logical completion. We thank all the members of the staff who co-operated in this venture. Our thanks are also to the subject experts and to the associations who gave valuable suggestions.

**Sri M. P. Madegowda**
Managing Director
Karnataka Textbook Society
Bengaluru.

**Prof. Baraguru Ramachandrappa**
Chairman-in-Chief
State Textbook Revision Committee
Bengaluru.

## परिष्करणासमितिः

१. **प्रो. बरगूरु रामचन्द्रप्पः,** सर्वाध्यक्षः, राज्यपठ्यपुस्तकपरिष्करणसमितिः, बेंगलूरु।

२. **श्री. के.एल्. ज्ञानप्रसाद् राव्,** अध्यक्षः, पठ्यपुस्तकपरिष्करणसमितिः, संस्कृत उपन्यासकः, विद्यावर्धक-सङ्घ-ज्यूनियर्-कालेज्, राजाजिनगर, बेंगलूरु।

**सदस्याः**

१. **श्री श्रीधरभट् ऐनकै,** निर्देशकः, वेदान्तभारति शिक्षण संस्था, के.आर्. नगर, मैसूरु ।

२. **डा. संतोष् हानगल्,** उपनिर्देशकः, संस्कृत-विश्वविद्यालय, बेंगलूरु।

३. **डा. एस्. प्रभुलिङ्ग देवरु,** प्रभारि प्राध्यापकः, सर्वकारीय श्री-चामराजेन्द्र-संस्कृत -कालेज्, बेंगलूरु।

४. **श्रीमती सुमङ्गला हेगडे,** संस्कृत शिक्षिका, सर्वकारीय बालिका प.पू. कालेज्, १३ क्रास्, मल्लेश्वरं, बेंगलूरु।

५. **श्री हजरत् अली. यु,** उपन्यासकः, ललित-कला-विभाग; तुमकूरु विश्व विद्यालय; तुमकूरु।

## परिष्करणोन्नतसमितिः

१. **डा.एच्.वि.वेणुगोपालः,** निवृत्तप्रांशुपालः, संस्कृतप्राध्यापकः, न्याषनल् कालेज् बसवनगुडि, बेङ्गलूरु।

२. **डा. जे.श्रीनिवासमूर्तिः,** निवृत्तप्रांशुपालः एम्.इ.एस्.कालेज्, मल्लेश्वरं, बेङ्गलूरु।

**प्रमुखमार्गदर्शकौ-**

**श्री एम्. पि. मादेगौड,** व्यवस्थापकनिर्देशकः, क.प.पु.सङ्घः(रि), बेङ्गलूरु।

**श्रीमती एम्. डि. उषा,** उपनिर्देशिका, क.प.पु. सङ्घः (रि) बेङ्गलूरु।

**संयोजिका**

**श्रीमती सुमा बि.के,** ज्येष्ठसहायकनिर्देशिका, क.प.पु.सङ्घः(रि), बेङ्गलूरु।

©KTBS NOT TO BE REPUBLISHED

# Foreword

In the pursuit of fostering a healthier and more balanced educational journey, we present this initiative aimed at reducing the weight of school bags. Education is the cornerstone of progress and it is our responsibility to ensure that the pursuit of knowledge is accompanied by the wellbeing of students.

As a first step, to reduce the burden of heavy bags, the School Education Department, Government of Karnataka has decided to print semester-wise textbooks in 2 parts i.e, Summative Assessment 1 and 2. This intervention will help significantly in reducing the weight of school bags.

This endeavour signifies a paradigm shift, acknowledging the strain posed by bulky bags on students.

@KTBS NOT TO BE REPUBLISHED

Manjushree. N, IAS
Managing Director
Karnataka Textbook Society (R)

# पाठानुक्रमणिका

C8Q4M4


| क्र.सं. | | पाठाः | पृष्ठसंख्या |
|---|---|---|---|
| 1. | प्रणतिः | पद्यम् – कण्ठपाठः करणीयः | 1 |
| 2. | अपूर्वमेला | गद्यम् – सम्भाषणम् | 8 |
| 3. | सन्धिः | व्याकरणम् | 17 |
| 4. | मिथ्याभिमानः | गद्यम् – कथा | 22 |
| 5. | कृदन्तः | व्याकरणम् | 29 |
| 6. | जीवनयोगः | पद्यम् | 36 |
| 7. | एकाग्रता | गद्यम् – कथा | 43 |
| 8. | समासः | व्याकरणम् | 48 |
| 9. | इन्दुः क्षीरनिधाविव | पद्यम् | 53 |
| 10. | कारकम् | व्याकरणम् | 60 |
| 11. | अलङ्कारः | व्याकरणम् | 63, 64 |
| 12. | छन्दः | व्याकरणम् | 65 |
| 13. | अनुवादः 1, 2, 3, 4 | व्याकरणम् | 68 |
| 14. | पत्राणि | व्याकरणम् | 70 |
| 15. | प्रबन्धाः | व्याकरणम् | 73 |


@KTBS NOT TO BE REPUBLISHED

| क्र.सं. | पूरकपाठाः | | पृष्ठसंख्या |
|---|---|---|---|
| 1. | उभयभारती | व्यक्तिपरिचयः | 74 |

## मासिकपाठयोजना

| मासाः | पाठाः |
|---|---|
| जून् | सेतुपाठः । प्रणतिः । अपूर्वमेला । |
| जुलै | सन्धिः । मिथ्याभिमानः । कृदन्तः । पत्रम् । कारकम् । जीवनयोगः |
| अगस्ट् | अनवादः १-४ । एकाग्रता । समासः । उभयभारती। प्रबन्धः। |
| सेप्टम्बर् | अलङ्कारः १-२। छन्दः। इन्दुः क्षीरनिधाविव |

@KTBS NOT TO BE REPUBLISHED

# प्रार्थना

## शारदाभुजङ्गम्

सुवक्षोजकुम्भां सुधापूर्णकुम्भाम्
प्रसादावलम्बां प्रपुण्यावलम्बाम् ।
सदास्येन्दुबिम्बां सदानोष्ठबिम्बाम्
भजे शारदाम्बामजस्रं मदम्बाम् ।।1।।

कटाक्षे दयार्द्रां करे ज्ञानमुद्राम्
कलाभिर्विनिद्रां कलापैः सुभद्राम्।
पुरस्त्रीं विनिद्रां पुरस्तुङ्गभद्राम्
भजे शारदाम्बामजस्रं मदम्बाम् ।।2।।

ललामाङ्कफालां लसद्गानलोलां।
सभक्तैकपालां यशःश्रीकपोलां।
करे त्वक्षमालां कनत्प्रत्नलोलां
भजे शारदाम्बामजस्रं मदम्बाम् ।।3।।

सुसीमन्तवेणीं दृशा निर्जितैणीं
रमत्कीरवाणीं नमद्वज्रपाणिं।
सुधामन्तरास्यां मुदा चिन्त्यवेणीं
भजे शारदाम्बामजस्रं मदम्बाम् ।।4।।

सुशान्तां सुदेहां दृगन्ते कचान्तां
लसत्सल्लताङ्गीमनन्तामचिन्त्यां।
स्मृतां तापसैः सर्गपूर्वस्थितां तां
भजे शारदाम्बामजस्रं मदम्बाम् ।।5।।

कुरङ्गे तुरङ्गे मृगेन्द्रे खगेन्द्रे
मराले मदेभे महोक्षेऽधिरूढां।
महत्यां नवम्यां सदा सामरूपां
भजे शारदाम्बामजस्रं मदम्बाम् ।।6।।

ज्वलत्कान्तिवह्निं जगन्मोहनाङ्गीं
साम्भोजसुभ्रान्तभृङ्गीं।
निजस्तोत्रसङ्गीतनृत्यप्रभाङ्गी
भजे शारदाम्बामजस्रं मदम्बाम् ।।7।।

भवाम्भोजनेत्राजसम्पूज्यमानां
लसन्मन्दहासप्रभावक्त्रचिह्नां ।
चलच्चञ्चला चारुताटङ्ककर्णां
भजे शारदाम्बामजस्रं मदम्बाम् ।।8।।

NOT TO BE REPUBLISHED ©KTBS

E4Z4A1

प्रथमः पाठः

# प्रणतिः

## कण्ठपाठः करणीयः

सर्वेषां कार्याणाम् आदौ विघ्नभयनाशाय मनश्शुद्धये च देवतास्तुतिः प्रणतिः च क्रियते। इयमेव भारतीयसंस्कृतिः परम्परा च । अत्र कानिचन देवतास्तोत्राणि दत्तानि।



कुण्डलीकृतनागेन्द्र खण्डेन्दुकृतशेखर ।
पिण्डीकृतमहाविघ्न ढुण्ढिराज नमोऽस्तु ते ।।1।।



शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्वदा सर्वदास्माकं सन्निधिं सन्निधिं क्रियात् ।।2।।



गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ।।3।।



तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ।।4।।



चिन्तामणिः प्रणमतां निशामणिशिरोमणिः ।
कपाली लोकपाली वः पातु नित्यं महाबलः ।।5।।

*****

KTBS
NOT TO BE REPUBLISHED

## शब्दार्थः

**प्रणतिः** = नमस्कारः, **कुण्डलीकृतम्** = वलयीकृतम्, **नागेन्द्रः** = सर्पराजः, **शारदाम्भोजम्** = शरत्कालीनकमलम्, **भिषक्** = वैद्यः, **तमः** = अन्धकारः, **इन्दुः** = चन्द्रः, **ज्योतींषि** = ग्रहनक्षत्राणि

## अन्वयार्थः

1. **कुण्डलीकृतनागेन्द्र** = वलयीकृतसर्प, **खण्डेन्दुकृतशेखर** = शिरोभूषणीकृतार्धचन्द्र, **पिण्डीकृतमहाविघ्न** = चूर्णीकृतमहाविघ्न, **ढुण्ढिराज** = गणनायक, **ते** = तुभ्यं, **नमः अस्तु** = नमस्कारः भवतु ।

**तात्पर्यम् -** हे वलयीकृतसर्प शिरोभूषणीकृतार्धचन्द्र महाविघ्नविनाशक गणपते ते नमस्कारः अस्तु ।

2. **सर्वदा** = सर्वदायिनी, **शारदाम्भोजवदना** = शरत्कालिककमलमुखी, **शारदा** = सरस्वती, **सन्निधिम्** = शुभसम्पत्सान्निध्यम्, **अस्माकम्** = नः भक्तानाम्, **वदनाम्बुजे** = मुखसरोजे, **सर्वदा** = सर्वकालेऽपि, **सन्निधिम्** = शुभनिवासम्, **क्रियात्** = कुर्यात्।

**तात्पर्यम् -** शरत्कालिककमलमुखी सर्वदायिनी सरस्वती अस्माकं मुखकमले सर्वदा शुभसम्पत्सान्निध्यं शुभनिवासं कुर्यात् ।

3. **सर्वलोकानाम्** = सर्वेषां जनानाम्, **गुरवे** = पूज्याय गुरवे, **भवरोगिणाम्** = इह जन्मनि कष्टमनुभवताम्, **भिषजे** = वैद्याय, सर्वविद्यानाम् = सर्वविधज्ञानानाम्, **निधये** = शेवधये, **दक्षिणामूर्तये** = देवाय दक्षिणामूर्तये, **नमः** = नमस्कारः।

**तात्पर्यम् -** सर्वेषां जनानां ज्ञानप्रदाय, अनेकजन्मसु दुःखकोटिम् अनुभवतां वैद्यस्वरूपाय, सर्वविधज्ञानानां निधये, दक्षिणामूर्तये नमः ।

© KTBS NOT TO BE REPUBLISHED

4. **तमोघ्नाय** = अन्धकारनाशकाय, **हिमघ्नाय** = तुषारनिवारणाय, **शत्रुघ्नाय** = शत्रुविनाशकाय, **अमितात्मने** = अनन्तरूपाय, **कृतघ्नघ्नाय** = कृतघ्ननाशकाय, **देवाय** = भगवते, **ज्योतिषां पतये** = ग्रहाणाम् अधिपतये, **नमः** = नमस्कारः ।

**तात्पर्यम् -** अज्ञानरूपस्य अन्धकारस्य विनाशकाय, हिमनिवारकाय, शत्रुनाशकाय, अत्यद्भुतस्वरूपाय, कृतघ्ननाशकाय, ग्रहपतये भगवते सूर्याय नमस्कारः।

5. **प्रणमताम्** = नमस्कुर्वताम्, **चिन्तामणिः** = चिन्तारत्नम्, **निशामणिशिरोमणिः** = चन्द्रचूडः, **कपाली** = कपालधरः, **लोकपाली** = जगद्रक्षकः, **महाबलः** = शिवः, **नित्यं** = सर्वदा, **वः** = युष्मान्, **पातु** = रक्षतु ।

**तात्पर्यम् –** शरणागतभक्तानां कामितार्थदः चन्द्रशेखरः कपालधरः जगद्रक्षकः शिवः सर्वदा युष्मान् रक्षतु ।

*****

## अभ्यासः

### १. एकवाक्येन उत्तरत ।

1. ढुण्ढिराजः कः ?
2. सर्वदा अस्माकं वदने का वसेत् ?
3. सर्वविद्यानां निधिः कः ?
4. दक्षिणामूर्तिः केषां भिषक् ?
5. तमोघ्नः कः ?
6. सूर्यः केषां पतिः ?
7. लोकपाली कः ?
8. महाबलः केषां चिन्तामणिः ?

@KTBS NOT TO BE REPUBLISHED

## २. रिक्तस्थानं पूरयत ।

1. कुण्डलीकृतनागेन्द्र .................. ।
2. सर्वदा .................. अस्माकम् ।
3. गुरवे ............................ ।
4. शत्रुघ्नाय ......................... ।
5. कपाली ....................... वः ।

## ३. संयोजयत ।

| | अ | आ |
|---|---|---|
| 1. | खण्डेन्दुकृतशेखरः | शिरोमणिः |
| 2. | सर्वदा | सूर्यः |
| 3. | गुरुः | दक्षिणामूर्तिः |
| 4. | हिमघ्नः | शारदा |
| 5. | निशामणिः | ढुण्ढिराजः |

@KTBS NOT TO BE REPUBLISHED

## ४. विरुद्धपदं लिखत ।

1. निशा
2. तमः
3. कृतघ्नः
4. विघ्नः

## ५. पर्यायपदं लिखत ।

1. इन्दुः
2. महाबलः
3. पङ्कजम्
4. हिमः

## ६. सन्धिं विभज्य नाम लिखत ।

1. वदनाम्बुजे
2. खण्डेन्दुः
3. नमोऽस्तु
4. सर्वदास्माकम्

## ७. श्लोकं पूरयत ।

1. शारदा ................................ ।

................................क्रियात् ॥

2. तमोघ्नाय ............................. ।

.............................पतये नमः ॥

## ८. द्वित्रैः वाक्यैः उत्तरं लिखत ।

1. गणेशः कीदृशः ?
2. दक्षिणामूर्तिं वर्णयत ।
3. शारदा कीदृशी ?
4. कीदृशः महाबलः वः पातु ?

@KTBS
NOT TO BE REPUBLISHED

*****

**प्रहेलिका**

**वक्त्रे श्रोत्रं ममास्त्यस्य श्रोत्रे वक्त्रं तथैव च ।**
**श्रुत्वा वार्तां क्षणादेव दूराद्दूरं वदाम्यहम् ॥**
**उत्तरम् - दूरवाणी**

## अवधेयांशः

### नमः इत्यादीनां प्रयोगः

**नमः, स्वस्ति, स्वाहा, स्वधा इत्यादीनाम् अव्ययानां प्रयोगे तत्सम्बद्धपदं चतुर्थीविभक्तौ भवति ।**

यथा –

1. सूर्याय नमः । 2. मित्रेभ्यः स्वस्ति ।

3. देवेभ्यः स्वाहा । 4. पितृभ्यः स्वधा ।

5. ढुण्ढिराजाय नमः । 6. शारदायै नमः ।

7. दक्षिणामूर्तये नमः । 8. ज्योतिषां पतये नमः ।

@KTBS NOT TO BE REPUBLISHED

*-----------------------*-----------------------*

## क्रियाकलापः

*** अधः दत्तानि पदानि उपयुज्य 'नमः' इति शब्देन सह वाक्यानि रचयत।**

देव
आचार्य
मुनि
हरि
अम्बा
रमा
गौरी
देवी

} नमः {

________________________________
________________________________
________________________________
________________________________
________________________________
________________________________
________________________________
________________________________

* कोष्टकस्थानि समुचितानि विशेषणानि चित्वा मञ्जूषायां लिखत ।

ढुण्ढिराजः

शारदा

दक्षिणामूर्तये

सूर्याय

@KTBS NOT TO BE REPUBLISHED

कुण्डलीकृतनागेन्द्रः, शारदाम्भोजवदना, तमोघ्नाय, गुरवे, हिमघ्नाय, पिण्डीकृतमहाविघ्नः, भिषजे, सर्वदा, निधये, शत्रुघ्नाय, खण्डेन्दुकृतशेखरः, गणपतिः, ज्ञानप्रदाय, काश्मीरपुरवासिनी, कृतघ्नघ्नाय, वरदा

## द्वितीयः पाठः

# अपूर्वमेला




Q1F7L8

अद्यत्वे संस्कृतभाषायाः व्याप्तिः वर्धमाना वर्तते । देशविदेशेषु बहवः संस्कृतासक्ताः सञ्जायमानाः दृश्यन्ते । सर्वत्र संस्कृतभाषाविषये आदरः दृश्यते। अत्र बेङ्गलूरुनगरे एकादशोत्तर द्विसहस्र तमे वर्षे प्रवृत्तायाः अभूतपूर्वायाः विश्वसंस्कृतपुस्तकमेलायाः चित्रणं सम्भाषणद्वारा प्रदत्तमस्ति ।




(दशमी कक्ष्या । संस्कृतावधिः । गुरुः कक्ष्यां प्रविशति ।)

सर्वे छात्राः – प्रणामः आर्य ।

आचार्यः – सुप्रभातं छात्राः उपविशन्तु ।

वामनः – आर्य अद्य ग्रामोत्सवः अस्ति । अतः कृपया अर्धदिनं विरामम् उद्घोषयतु ।

आचार्यः – न बाल, विरामं दातुम् अनुमतिः नास्ति ।

संहिता – तर्हि आर्य, कृपया अद्य उत्सवविषये एव पाठः अस्तु ।

आचार्यः – उत्सवविषये मास्तु । अद्य भवतां सन्तोषार्थम् अपूर्वायाः मेलायाः विषये पाठः भवतु ।

प्रभा – आर्य, का मेला ? कीदृशी मेला ? यतः शाकमेला, उद्योगमेला, कृषिमेला, पुस्तकमेला, कुम्भमेला इति विविधाः मेलाः सन्ति खलु ?

आचार्यः – सत्यम् । मेलाः सन्ति । किन्तु अद्य अभूतपूर्वायाः पुस्तकमेलायाः विषये जानीमः। अधुना विश्वसंस्कृतपुस्तकमेलायाः वैभवं विवृणोमि।

सर्वे छात्राः – अस्तु आर्य । वयमपि ज्ञातुम् इच्छामः ।

©KTBS NOT TO BE REPUBLISHED



आचार्यः – संस्कृतभारती इति संस्थया कर्नाटकसर्वकारस्य संस्कृतानुरागिणां च साहाय्येन 2011 तमे वत्सरे विश्वसंस्कृतपुस्तकमेला इति महान् कार्यक्रमः समायोजितः।

मिहिरः – अहो, विश्वसंस्कृतपुस्तकमेला वा? बेङ्गलूरुनगरे सम्पन्ना खलु?

प्रभा – तद्वा? अहं तु जनकेन सह तत्र गतवती । सा तु महामेला ।

आचार्यः – आम् । बालाः, संस्कृतपुस्तकानाम् एतादृशः महोत्सवः जगति कुत्रापि न सञ्चालितः ।

संहिता – आर्य, तत्र के के अंशाः आसन् ? संस्कृतपुस्तकमेलायाः विशेषः कः ?

आचार्यः – तत्र तु नानाविधग्रन्थानाम् आपणाः, अनेकाः चित्रप्रदर्शिन्यः, मनोरञ्जनकार्यक्रमाः, संस्कृतग्रामः, खाद्यापणाः, स्पर्धावल्यः, शताधिकनूतनग्रन्थलोकार्पणम् इत्यादयः विविधाः कार्यक्रमाः आसन् ।

मिहिरः – आर्य, पुस्तकप्रदर्शिन्याः विषये किञ्चिदधिकं वदतु ।

आचार्यः – उत्तमा जिज्ञासा । अस्याः नाम एव पुस्तकमेला । अत्र संस्कृतपुस्तकानाम् एव प्राधान्यम् । समग्रभारतवर्षस्य ग्रन्थप्रकाशकाः, आपणिकाः, लेखकाः च समागत्य संस्कृतपुस्तकानां प्रदर्शनस्य विक्रयस्य च आपणान् समायोजयन्।

गीता – आर्य तत्र कीदृशानि पुस्तकानि आसन् ?

©KTBS NOT TO BE REPUBLISHED

आचार्यः – तत्र लक्षाधिकाः वेदशास्त्रधर्मपुराणेतिहासकाव्यनाटकसम्बद्धाः, खगोलनृत्यसङ्गीतायुर्वेदगणितविज्ञानयोगविषयकाः संस्कृतग्रन्थाः तालपत्राणि च प्रदर्शिताः । धनव्यवहारः सम्पन्नः । सन्दर्शकाः सोत्साहं ग्रन्थान् अक्रीणन् । अस्मिन् उत्सवे दिनद्वये लक्षाधिकाः जनाः भागम् ऊढ्वा धन्यभावनाम् अनुभूतवन्तः ।

प्रभा – अहो इयं मेला विराड्रूपा आसीत् । अहमपि पुस्तकानि क्रीतवती।



वामनः – आर्य, तत्र अन्याः काः प्रदर्शिन्यः आसन् ?

आचार्यः – वैज्ञानिकचित्रप्रदर्शिनी आसीत् । तत्र प्राचीनभारतस्य विज्ञानिनां, तेषां शोधफलानां च प्रदर्शनम् आसीत् । पौराणिककथानां महाकाव्यादीनां चित्रफलकानि सविवरणं प्रदर्शितानि ।

प्रभा – तत्र सभागारे वेदिकायां कश्चन कार्यक्रमः अभवत् खलु आर्य ?

आचार्यः – सत्यं वत्से । तत्र काव्यशास्त्रादीनां चिन्तनगोष्ठ्यः, विद्वत्सम्माननम्, अभ्यागतानां भाषणानि, नूतनग्रन्थानां लोकार्पणं च अभवन् ।

संहिता – आर्य, किं प्रतिसायं मनोरञ्जनकार्यक्रमाः आसन् ?

आचार्यः – आम् । प्रतिसायं विश्वप्रसिद्धैः कलाविद्भिः गीतानि, नृत्यानि, रूपकाणि, सङ्गीतरसमञ्जरी च वेदिकायां प्रदर्शितानि ।

प्रभा – अन्यत्र कश्चन ग्रामसदृशः परिसरः सर्वान् आकर्षयन् आसीत् खल्वार्य ?

आचार्यः – आम् । समग्रायां मेलायां बहुजनाकृष्टं स्थानं तु संस्कृतग्रामः। एकस्मिन् भागे समग्रग्रामपरिसरः निर्मितः आसीत् । तत्र पाठशाला, द्विचक्रिका-समीकरणापणः, पत्रालयः, जल्पनकेन्द्रं, ज्योतिषकेन्द्रम् इत्यादीनि अवर्तन्त। ग्राममार्गे वीथीनाटकमपि प्राचलत् । संस्कृतग्रामे सर्वे जनाः संस्कृतभाषया एव व्यवहरन्तः आसन् । कश्चन संस्कृतज्ञः साभिनयं गायन् नृत्यति स्म । सन्दर्शकाः अपि तम् अनुसरन्तः गायन्तः नृत्यन्ति स्म । यथा –

**'मेला मेला पुस्तकमेला । कुत्र च मेला ? कीदृशी मेला ?**

**विश्वसंस्कृतपुस्तकमेला ।**

**अत्र पश्यतु संस्कृतमेला । तत्र पश्यतु पुस्तकमेला ।**

**मेला मेला पुस्तकमेला । विश्वसंस्कृतपुस्तकमेला ।'**

NOT TO BE REPUBLISHED @KTBS

इति सवाद्यं करताडनैः सह सानन्दं नृत्यन्तिस्म जनाः। पश्यन्ति स्म सहस्राधिकाः पर्यटकाः ।

संहिता – अहं न गतवती इति मम व्यथा भवति आर्य । अहं वञ्चिता सन्तोषात् ।

आचार्यः – चिन्तां न कुर्वन्तु । 2013 तमे वत्सरे उज्जयिन्याम् एतादृशः एव संस्कृतसाहित्योत्सवः आयोजितः आसीत् । एवमेव आगामिनि काले बहुत्र एतादृश्यः मेलाः सम्भविष्यन्ति । यतः संस्कृतभाषायाः व्याप्तिः संवर्धिता अस्ति । अधिकाः जनाः संस्कृतज्ञाः सञ्जायमानाः सन्ति । देशान्तरेऽपि संस्कृतासक्ताः सन्ति । सर्वत्र समाजे संस्कृतभाषाविषये आदरः दृश्यते ।

वामनः – अग्रिमकार्यक्रमे अहम् अवश्यं पितृभ्यां सह भागी भविष्यामि।

आचार्यः – सर्वेऽपि छात्राः अग्रिमसंस्कृतपुस्तकमेलायां नूनं भागं वहन्तु।

सर्वे – **"संस्कृताधीतिनः सन्तु सर्वे भारतभूमिजाः।**
**संस्कृतेनैव कुर्वन्तु व्यवहारं परस्परम् ।।"**
**वदतु संस्कृतम् । जयतु भारतम् ।**

*****

© NCTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. एकवाक्येन उत्तरत ।

1. वामनः किमर्थं विरामम् इच्छति ?
2. विश्वसंस्कृतपुस्तकमेला कुत्र सम्पन्ना ?
3. मेलायाः आयोजिका संस्था का ?

4. का जनकेन सह पुस्तकमेलां गतवती ?

5. मेलायां बहुजनाकृष्टं स्थानं किम् ?

**२. रिक्तस्थानं पूरयत ।**

1. संस्कृतपुस्तकमेलायाः .................... विवृणोमि ।

2. सन्दर्शकाः ......................... ग्रन्थान् अक्रीणन् ।

3. ....... तमे वत्सरे विश्वसंस्कृतपुस्तकमेला समायोजिता ।

4. अस्मिन् उत्सवे ................. जनाः भागम् अवहन् ।

5. प्रतिसायं .......................... कार्यक्रमाः आसन् ।

**३. विरुद्धपदं लिखत ।**

1. एकः 2. नूतनम् 3. सानन्दम् 4. आदरः

**४. पर्यायपदं लिखत ।**

1. उत्सवः 2. जनकः 3. सन्तोषः 4. पर्यटकः

**५. सन्धिं विभज्य नाम लिखत ।**

1. ग्रामोत्सवः 2. लोकार्पणम् 3. खल्वार्य 4. पत्रालयः

**६. विग्रहवाक्यं विलिख्य समासनाम लिखत ।**

1. पुस्तकमेला 2. महोत्सवः 3. संस्कृतग्रामः 4. करताडनम्

**७. द्वित्रैः वाक्यैः उत्तरं लिखत ।**

1. विश्वसंस्कृतपुस्तकमेलायां के के अंशाः आसन् ?

2. पुस्तकमेलायाः वेदिकायां के कार्यक्रमाः अभवन् ?

@KTBS NOT TO BE REPUBLISHED

८. **कर्णाटकभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. संस्कृतग्रामस्य वैशिष्ट्यं वर्णयत ।
2. विश्वसंस्कृतपुस्तकमेलायाः वैभवं वर्णयत ।

*****

## अवधेयांशः

### लट् लकारः परस्मैपदम् - खेल् धातुः (ಆಡು/To Play)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | खेलति | खेलतः | खेलन्ति |
| म.पु. | खेलसि | खेलथः | खेलथ |
| उ.पु. | खेलामि | खेलावः | खेलामः |

### लट् लकारः आत्मनेपदम् - सेव् धातुः (ಸೇವೆ ಮಾಡು/To Serve)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | सेवते | सेवेते | सेवन्ते |
| म.पु. | सेवसे | सेवेथे | सेवध्वे |
| उ.पु. | सेवे | सेवावहे | सेवामहे |

### लोट् लकारः परस्मैपदम् - खेल् धातुः (ಆಡು/To Play)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | खेलतु/खेलतात् | खेलताम् | खेलन्तु |
| म.पु. | खेल/खेलतात् | खेलतम् | खेलत |
| उ.पु. | खेलानि | खेलाव | खेलाम |

©KTBS NOT TO BE REPUBLISHED

**लोट् लकारः आत्मनेपदम् - सेव् धातुः (ಸೇವೆ ಮಾಡು/To Serve)**

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | सेवताम् | सेवेताम् | सेवन्ताम् |
| म.पु. | सेवस्व | सेवेथाम् | सेवध्वम् |
| उ.पु. | सेवै | सेवावहै | सेवामहै |

## क्रियाकलापः

**✻ रिक्तस्थानेषु समुचितक्रियापदरूपाणि पूरयत ।**

1. नृत्यसि ................ ............... । (नृत् - लट् - म.पु.)
2. ................ .............. क्रीडाम । (क्रीड् - लोट् - उ.पु.)
3. राजते................ ............... । (राज् - लट् - प्र.पु.)
4. ................. ..............भजामहै । (भज् - लोट् - उ.पु.)

**✻ समुचितं क्रियापदं चित्वा वाक्यानि पूरयत ।**

1. बालाः क्रीडाङ्गणं ................. । (गच्छाम, गच्छन्तु, गच्छत)
2. आचार्यः प्रश्नं .................. । (पृच्छसि, पृच्छति, पृच्छामि)
3. अहं प्रतिदिनं देवं ................। (वन्दताम्, वन्दस्व, वन्दै)
4. वायुः सर्वत्र ..................... । (वर्तसे, वर्ते, वर्तते)

@KTBS NOT TO BE REPUBLISHED

R3P1D3

## तृतीयः पाठः

# सन्धिः

वर्णानाम् अतिसामीप्येन उच्चारणेन यः वर्णव्यत्यासः भवति सः सन्धिः। सन्धयः त्रिप्रकारकाः सन्ति । यथा –

सन्धिः
- स्वरसन्धिः
- व्यञ्जनसन्धिः
- विसर्गसन्धिः

## विसर्गसन्धिः

अयोगवाहेषु अन्यतमः विसर्गः । विसर्गस्य स्वरे व्यञ्जने वा परे विसर्गस्य स्थाने चत्वारः आदेशाः भवन्ति । तदा विसर्गसन्धिः सम्भवति । विसर्गस्य एते चत्वारः आदेशाः –

**विसर्गसन्धिः**
- सकारादेशः
- रेफादेशः
- उकारादेशः
- लोपः

1. **विसर्गस्य सकारादेशः** – विसर्गात् परं क ख प फ अक्षरैः विना यदि इतराणि कर्कशव्यञ्जनानि भवन्ति तर्हि विसर्गस्य स्थाने सकारादेशः भवति ।

यथा – **(ः + कर्कशव्यञ्जनम् = ः = सकारः)**

यथा –शिवः + तु = शिवस्तु ।

रामः + तत्र = रामस्तत्र ।

उग्रः + सर्पः = उग्रस्सर्पः ।

मुनिः + सः = मुनिस्सः ।

@KTBS NOT TO BE REPUBLISHED

२. **विसर्गस्य रेफादेशः** – अकारम् आकारं च विहाय इतरेभ्यः स्वरेभ्यः परं विसर्गः, ततः परं स्वरः उत मृदुव्यञ्जनं भवति चेत् विसर्गस्य रेफादेशः भवति।
**यथा-(इः, उः, ऋः, एः, ऐः, ओः, औः+ स्वरः/मृदुव्यञ्जनम्=: =रकारः)**

यथा –हरिः + एव = हरिरेव ।
श्रीः + इव = श्रीरिव ।
गुरुः + ब्रह्मा = गुरुर्ब्रह्मा ।
तैः + न = तैर्न ।

3. **विसर्गस्य उकारादेशः** – अकारात् परं विसर्गः ततः परम् अकारः अथवा मृदुव्यञ्जनं भवति चेत् विसर्गस्य स्थाने उकारादेशः भवति ।
**यथा - (अः + अ/मृदुव्यञ्जनम् = : = उकारः)**

**यथा** –कः + अपि = कोऽपि ।
विप्रः + असौ = विप्रोऽसौ ।
गजः + गच्छति = गजो गच्छति ।
रामः + विग्रहवान् = रामो विग्रहवान् ।

४. **विसर्गस्य लोपः** – अकारात् परं विसर्गः ततः परम् अकारं विना अन्यस्वरः भवति, अपि च आकारात् परं विसर्गः, ततः परं स्वरः अथवा मृदुव्यञ्जनं भवति चेत् विसर्गस्य लोपः भवति ।
**यथा - (अः + इ/उ/ऋ... = : = लोपः)**
**(आः + अ/इ/उ/ऋ .. मृदुव्यञ्जनम् = : = लोपः)**

यथा –देवः + इति = देव इति ।
अर्जुनः+ उवाच = अर्जुन उवाच ।
बालाः + अपि = बाला अपि ।
नराः + गच्छन्ति = नरा गच्छन्ति ।

*****

©KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. एकवाक्येन उत्तरत ।

1. सन्धिः नाम कः ?
2. सन्धिषु कति प्रकाराः सन्ति?
3. विसर्गस्य कति आदेशाः भवन्ति ?

### २. सन्धिं कृत्वा नाम लिखत ।

1. नन्दनः + हसति
2. मयूरः + नृत्यति
3. मैत्रेयः + इच्छति
4. मुनिः + नमति
5. गुरुः + देवः
6. गुरुः + साक्षात्
7. देवाः + एव
8. गजः + तत्र

### ३. सन्धिं विभज्य नाम लिखत ।

1. सेवक इति
2. बालो गच्छति
3. बालस्तत्र
4. ज्योतिर्गमय

### ४. चतुर्थपदं लिखत ।

1. रामेति – गुणसन्धिः । रामस्तत्र – ........................ ।
2. मुरारिरपि – विसर्गस्य रेफः । सुरा नम्याः – ..............।
3. तत्रापि – सवर्णदीर्घसन्धिः। देव इति – .................. ।
4. सन्धिप्रकाराः – त्रयः। विसर्गविकाराः – .................. ।

@KTBS NOT TO BE REPUBLISHED

## ५. समूहेतरपदं लिखत ।

1. गजस्तत्र, पुनरपि, देव इति, तदपि ।
2. तच्च, सद्गुणः, तन्मयः, गुरुरपि ।
3. मृत्योर्मा, देवैरिति, मुरारिः, गुरुर्देवः ।
4. सकारादेशः, वकारादेशः, रकारादेशः, उकारादेशः ।

*****

### अवधेयांशः

*** विसर्गस्य जिह्वामूलीयः उपध्मानीयः च विकल्पेन भवति।**

**यथा -** कः + करोति = क ᳵ करोति वा कः करोति ।

कः + कपिः = क ᳵ कपिः वा कः कपिः ।

कः + पतति = क ᳶ पतति वा कः पतति ।

कः + पोषकः = क ᳶ पोषकः वा कः पोषकः ।

* **कर्कशव्यञ्जनानि** - क्, ख्, च्, छ्, ट्, ठ्, त्, थ्, प्, फ्, श्, ष्, स्।

* **मृदुव्यञ्जनानि** - ग्, घ्, ङ्, ज्, झ्, ञ्, ड्, ढ्, ण्, द्, ध्, न्, ब्, भ्, म्, य्, र्, ल्, व्, ह् ।

NOT TO BE REPUBLISHED @KTBS

| स्वरसन्धिः | व्यञ्जनसन्धिः | विसर्गसन्धिः |
|---|---|---|
| 1. सवर्णदीर्घसन्धिः | 1. श्चुत्वसन्धिः | 1. विसर्गस्य सकारः |
| 2. गुणसन्धिः | 2. ष्टुत्वसन्धिः | 2. विसर्गस्य लोपः |
| 3. वृद्धिसन्धिः | 3. जश्त्वसन्धिः | 3. विसर्गस्य रकारः |
| 4. यण्सन्धिः | 4. अनुनासिकसन्धिः | 4. विसर्गस्य उकारः |
| 5. यान्तवान्तादेशसन्धिः | 5. अनुस्वारसन्धिः | |
| 6. पूर्वरूपसन्धिः | 6. परसवर्णसन्धिः | |

## क्रियाकलापः

*** समुचितम् उत्तरं चित्वा लिखत ।**

1. तरुणा नमन्ति – अत्र अयं सन्धिः । ................................ ।

   1. स्वरसन्धिः 2. विसर्गसन्धिः 3. व्यञ्जनसन्धिः 4. आगमसन्धिः

2. नन्दनः + वसति – अत्र सन्धिरूपम् एवं भवति । ................ ।

   1. नन्दन वसति 2. नन्दनस्वसति 3. नन्दनो वसति 4. नन्दनर्वसति

3. बालस्तत्र – अत्र सन्धिविभागः एवं भवेत् । ...................... ।

   1. बालः+तत्र 2. बाल+तत्र 3. बालो+तत्र 4. बालस्+तत्र

4. मुनिः + अयम् – अत्र विसर्गस्य अयमादेशः भवेत् । ............ ।

   1. उकारादेशः 2. सकारादेशः 3. रकारादेशः 4. लोपः

5. गुरुर्ब्रह्मा – विसर्गस्य रकारः। गुरुस्साक्षात् – विसर्गस्य ............ ।

   1. लोपः 2. सकारः 3. उकारः 4. रकारः

6. अत्र समूहेतरपदम् एतत् भवति । ................................ ।

   1. शिशुस्तव 2. मदो न 3. इत्यादिः 4. गुरुर्देवः

*****

© KTBS NOT TO BE REPUBLISHED

**प्रहेलिका**

**अस्ति कुक्षिः शिरो नास्ति बाहुरस्ति निरङ्गुलिः ।**
**अपदो नरभक्षी च यो जानाति स पण्डितः ।।**

**उत्तरम् - युतकम्**

## चतुर्थः पाठः

# मिथ्याभिमानः

A5X1S1

जगति धनुर्विद्यायाम् अप्रतिमशूरः इति कारणात् अर्जुनस्य अत्यन्तम् अहङ्कारः आसीत्। किन्तु तस्य अहङ्कारः मिथ्या इति श्रीकृष्णेन अत्र प्रदर्श्यते। मानवस्य आत्मविश्वासः भवेत् किन्तु अभिमानः न भवेत् इति एषा घटना निरूपयति ।

कुरुक्षेत्रे कौरवपाण्डवानां मध्ये भीषणं युद्धं प्रचलति स्म । सर्वत्र हाहाकारः आसीत्। एकस्मिन् दिने अर्जुनः कर्णः च युद्धार्थं युद्धभूमौ उपस्थितौ । कर्णार्जुनयोः भीषणं युद्धं प्रवृत्तम् । उभयोः वीरतां दृष्ट्वा सर्वे आश्चर्यचकिताः अभवन्।

युद्धकाले एकः प्रसङ्गः उद्भूतः । अर्जुनस्य बाणप्रहारेण कर्णस्य रथः एकं योजनं प्रतिसरति स्म । किन्तु कर्णस्य बाणप्रहारेण अर्जुनस्य रथः किञ्चिन्मात्रं प्रतिसरति स्म । युद्धसमये अर्जुनस्य सारथिः कृष्णः आसीत् । कृष्णः एतत् सर्वं दृष्ट्वा वारं वारं "साधु कर्ण साधु" इति कर्णं साधुवादैः अभिनन्दति स्म ।

© KTBS NOT TO BE REPUBLISHED



एतत् सर्वं दृष्ट्वा कोपाविष्टः अर्जुनः कृष्णम् अपृच्छत् – "हे मधुसूदन! मम बाणप्रहारेण कर्णस्य रथः योजनपरिमितं दूरं गच्छति, तथापि मह्यं साधुवादं न ददाति भवान् । कर्णस्य बाणप्रहारेण मम रथः किञ्चिन्मात्रं पृष्ठतः गच्छति, तथापि भवान् कर्णाय साधुवादं यच्छति । एवं किमर्थम् ?"

एतत् श्रुत्वा, हसन् कृष्णः अकथयत् - हे कौन्तेय ! ध्यानपूर्वकं श्रृणु । भवतः रथे सारथिः अहं स्वयम् अस्मि । अन्यत् च भवतः रथस्य पताकायां पवनपुत्रः हनूमान् स्वयं विराजते । मम हनूमतः च भारेण भवतः रथः भारयुक्तः बलवान् च अस्ति । तथापि कर्णस्य बाणप्रहारेण भवतः रथः पृष्ठतः गच्छति । चिन्तयतु, यदि अहं हनूमान् च भवतः रथात् अधः अवतरावः तर्हि भवतः का गतिः भवेत् ? इति कृष्णस्य वचनं श्रुत्वा अर्जुनः अन्ते यथार्थं ज्ञातवान् । सः अहङ्कारं त्यक्त्वा कृष्णस्य पादयोः पतित्वा क्षमां याचितवान् । अनेन प्रकारेण कृष्णेन अर्जुनस्य मिथ्याभिमानः खण्डितः ।

*****

## अभ्यासः

### १. एकवाक्येन उत्तरत ।

1. केषां मध्ये भीषणं युद्धं प्रचलति स्म ?
2. अर्जुनस्य बाणप्रहारेण कर्णस्य रथः कियत् दूरं प्रतिसरति स्म ?
3. कृष्णः कर्णं कैः अभिनन्दति स्म ?
4. कर्णार्जुनयोः कीदृशं युद्धं प्रवृत्तम् ?
5. अर्जुनः अन्ते किं ज्ञातवान् ?

@KTBS NOT TO BE REPUBLISHED

## २. रिक्तस्थानं पूरयत ।

1. उभयोः ............... दृष्ट्वा सर्वे आश्चर्यचकिताः ।
2. हे कौन्तेय ................................ श्रृणु ।
3. कृष्णेन अर्जुनस्य ...................... खण्डितः ।
4. अर्जुनस्य रथः .................... प्रतिसरति स्म ।
5. अर्जुनस्य सारथिः ...................... आसीत् ।

## ३. पर्यायपदं लिखत ।

1. मधुसूदनः 2. कौन्तेयः 3. साधुवादः 4. हनूमान्

## ४. यथानिर्देशम् उत्तरं लिखत ।

1. 'भवतः का गतिः भवेत् ।'
   कः पाठः ? कः अवदत् ? कम् अवदत् ?
2. 'भवान् कर्णाय साधुवादं यच्छति ।'
   कः पाठः ? कः अवदत् ? कम् अवदत् ?

## ५. द्वित्रैः वाक्यैः उत्तरं लिखत ।

1. अर्जुनः कृष्णं किम् अपृच्छत् ?
2. कर्णार्जुनयोः युद्धं कथम् आसीत् ?

## ६. कर्णाटकभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।

1. कृष्णेन अर्जुनस्य मिथ्याभिमानः कथं खण्डितः ?
2. कृष्णः अर्जुनं कथं समाधत्ते इति विवृणुत ।

*****

NOT TO BE REPUBLISHED @KTBS

## अवधेयांशः

### प्रयोगविशेषः

✻ लट् लकारेण सह स्मइति पदं यदा उपयुज्यते तदा वर्तमानकालार्थकस्य लट् लकरारस्य भूतकालार्थः भवति । तत्र पाणिनीयं सूत्रम् – 'लट् स्मे'।

यथा –

| **वर्तमानकालः** | **भूतकालः** |
|---|---|
| प्रतिसरति | प्रतिसरति स्म |
| प्रयच्छति | प्रयच्छति स्म |
| गच्छति | गच्छति स्म |
| पालयति | पालयति स्म |
| पठति | पठति स्म |
| शृणोति | शृणोति स्म |
| अभिनन्दति | अभिनन्दति स्म |

✻ **अभितः, परितः, प्रति इत्यादीनाम् अव्ययानां योगे तत्सम्बद्धपदस्य द्वितीया विभक्तिः भवति । यथा -**

1. गुरुम् अभितः शिष्याः उपविशन्ति ।
2. नदीम् अभितः ग्रामः दृश्यते ।
3. कृष्णं परितः गोपिकाः नृत्यन्ति ।
4. नगरं परितः यन्त्रागाराणि विद्यन्ते ।
5. अहं ग्रामं प्रति गच्छन् अस्मि ।
6. सः अध्यापकं प्रति पत्रं लिखति ।

@KTBS NOT TO BE REPUBLISHED

## क्रियाकलापः

*** मञ्जूषायां दत्तानि पदानि उपयुज्य वाक्यानि पूरयत ।**

| |
|---|
| **मृतः, बाणप्रयोगं, व्याधः, वेदनया, वनं, वराहं, विदीर्णवान्, आक्रमणं, व्रणः** |

कश्चन ................................. आसीत् ।

सः एकदा .............................. गतवान् ।

तत्र ................................. एकं दृष्टवान् ।

महता आनन्देन सः वराहं ................. कृतवान् ।

वराहस्य शरीरे महान् ........................ जातः ।

तदा वराहः कोपेन व्याधस्य उपरि ........... कृतवान् ।

तस्य शरीरं स्वदन्ताभ्यां .......................... च ।

तेन व्याधः ...................................... ।

व्रणस्य कारणात् .................... वराहोऽपि मृतः ।

@KTBS NOT TO BE REPUBLISHED

## अवधेयांशः

| प्रयोगः | कर्तृपदम् | कर्मपदम् | क्रियापदम् | प्रधानम् |
|---|---|---|---|---|
| 1. कर्तरिप्रयोगः | प्रथमान्तम् | द्वितीयान्तम् | परस्मैपदम्<br>आत्मनेपदम् | कर्ता |
| 2. कर्मणिप्रयोगः | तृतीयान्तम् | प्रथमान्तम् | आत्मनेपदम् | कर्म |
| 3. भावेप्रयोगः | तृतीयान्तम् | नास्ति | आत्मनेपदम् | क्रिया |

| कर्तरि प्रयोगः | कर्मणि प्रयोगः | भावे प्रयोगः |
|---|---|---|
| 1. राधा फलं नयति । | राधया फलं नीयते । | – |
| 2. भवान् देवं वन्दताम् । | भवता देवः वन्द्यताम्। | – |
| 3. अहं पाठं पठिष्यामि । | मया पाठः पठिष्यते । | – |
| 4. लुण्ठाकः धनं चोरितवान्। | लुण्ठाकेन धनं चोरितम् । | – |
| 5. पुत्राः जनकं सेवन्ते । | पुत्रैः जनकः सेव्यते । | – |
| 6. अहं कृतवान् । | मया कृतम् । | – |
| 7. त्वम् अधावः । | – | त्वया अधाव्यत । |
| 8. वृद्धः स्वपिति । | – | वृद्धेन सुप्यते । |
| 9. कन्याः हसन्ति । | – | कन्याभिः हस्यते । |
| 10. शिशुः रोदिति । | – | शिशुना रुद्यते । |

*****

© KTBS NOT TO BE REPUBLISHED

## क्रियाकलापः

* प्रेक्षणीयान् अंशान् तत्सम्बद्धैः प्रेक्षणीयस्थलैः सह रेखाभिः संयोजयत ।

| प्रेक्षणीयः अंशः | प्रेक्षणीयं स्थलम् |
|---|---|
| शारदाम्बा | धर्मस्थलम् |
| गोलगुम्बज् | शिरसि |
| बाहुबलिः | शृङ्गगिरिः |
| महाबलेश्वरः | सवदत्ति |
| सेन्ट् फिलोमिना चर्च् | विजयपुरम् |
| मारिकाम्बा | गोकर्णः |
| मञ्जुनाथस्वामी | कूडलसङ्गमः |
| एल्लम्मा | बेङ्गलूरु |
| बसवेश्वरः | मैसूरु |
| विधानसौधः | श्रवणबेलगोल |

@KTBS NOT TO BE REPUBLISHED

**पञ्चमः पाठः**

# कृदन्तम्

कृत्–प्रत्ययान्तं पदं कृदन्तम् । धातुना सह कृत् प्रत्यययोगेन कृदन्तम् उत्पद्यते । कृदन्तं नामपदम् अव्ययं वा भवति । अत्र वर्तमानकाले भूतकाले विध्यर्थे च प्रयुज्यमानाः कृत्प्रत्ययाः प्रदत्ताः । कृदन्तनामपदानि कृदन्ताव्ययानि च दत्तानि । कृदन्तनामपदानां (विशेषणानां) रूपाणि त्रिषु लिङ्गेषु विभिन्नानि भवन्ति ।




@KTBS NOT TO BE REPUBLISHED

## १. कृदन्तनामपदम्

### वर्तमानकृदन्तानि

**१. शतृ प्रत्ययः -**

परस्मैपदिभ्यः धातुभ्यः वर्तमानकालार्थे शतृ (अत्) प्रत्ययः भवति । यथा –

| धातुः | प्रत्ययः | पुंल्लिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|---|
| भू | शतृ | भवन् | भवन्ती | भवत् |
| पठ् | शतृ | पठन् | पठन्ती | पठत् |

यथा –पठन् रटन् लिखन् पृच्छन् अभ्यस्यन् चिन्तयन् मुहुः ।
अविस्मरन् निजं पाठं छात्रो भवति पण्डितः ।।

## २. शानच् प्रत्ययः -

आत्मनेपदिभ्यः धातुभ्यः वर्तमानकालार्थे शानच् (आन) प्रत्ययः भवति । यथा –

| धातुः | प्रत्ययः | पुल्लिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|---|
| वृत् | शानच् | वर्तमानः | वर्तमाना | वर्तमानम् |
| शी | शानच् | शयानः | शयाना | शयानम् |
| शुभ् | शानच् | शोभमानः | शोभमाना | शोभमानम् |

# भूतकृदन्तानि

## १. क्त प्रत्ययः -

भूतकालार्थे सर्वेभ्यः धातुभ्यः क्त (त) प्रत्ययः भवति । यथा –

| धातुः | प्रत्ययः | पुल्लिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|---|
| पठ् | क्त | पठितः | पठिता | पठितम् |
| कृ | क्त | कृतः | कृता | कृतम् |
| ताड् | क्त | ताडितः | ताडिता | ताडितम् |
| वन्द् | क्त | वन्दितः | वन्दिता | वन्दितम् |

## २. क्तवतु प्रत्ययः -

भूतकालार्थे सर्वेभ्यः धातुभ्यः क्तवतु (तवत्) प्रत्ययः भवति । यथा –

| धातुः | प्रत्ययः | पुल्लिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|---|
| गम् | क्तवतु | गतवान् | गतवती | गतवत् |
| कृ | क्तवतु | कृतवान् | कृतवती | कृतवत् |
| ज्ञा | क्तवतु | ज्ञातवान् | ज्ञातवती | ज्ञातवत् |
| दा | क्तवतु | दत्तवान् | दत्तवती | दत्तवत् |

©KTBS NOT TO BE REPUBLISHED

## विध्यर्थककृदन्तानि

विध्यर्थे धातोः तव्यत्, तव्य, अनीयर् (अनीय) एते प्रत्ययाः भवन्ति । एते सकर्मकधातोः कर्मणि अकर्मकधातोः भावे च भवन्ति । यथा –

| धातुः | प्रत्ययः | पुल्लिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|---|
| कृ | तव्यत् | कर्तव्यः | कर्तव्या | कर्तव्यम् |
| गम् | तव्य | गन्तव्यः | गन्तव्या | गन्तव्यम् |
| बुध् | अनीयर् | बोधनीयः | बोधनीया | बोधनीयम् |

## २. कृदन्ताव्ययानि

तुमुन्, क्त्वा इत्यादीनां प्रत्ययानां योगेन निष्पन्नानि कृदन्तरूपाणि अव्ययानि भवन्ति।

### १. तुमुन् प्रत्ययः -

सामान्यतः उद्देशक्रियावाचकधातोः तुमुन् प्रत्ययः भवति । यथा –

| धातुः | प्रत्ययः | कृदन्ताव्ययम् |
|---|---|---|
| लिख् | तुमुन् | लेखितुम् |
| कृ | तुमुन् | कर्तुम् |

**यथा -**

हसितुं भ्रमितुं द्रष्टुं खेलितुं खादितुं तथा ।
कथां श्रोतुं च स्वप्तुं च रोचते शैशवे सदा ।।

@KTBS NOT TO BE REPUBLISHED

## २. क्त्वा प्रत्ययः -

समानकर्तृकयोः क्रिययोः पूर्वकालिकक्रियावाचकाद्धातोः क्त्वा प्रत्ययः भवति ।

| धातुः | प्रत्ययः | कृदन्ताव्ययम् |
|---|---|---|
| लिख् | क्त्वा | लिखित्वा |
| कृ | क्त्वा | कृत्वा |

## ३. ल्यप् प्रत्ययः -

उपसर्गयुक्तेभ्यः धातुभ्यः क्त्वाप्रत्ययस्य स्थाने ल्यप् आदेशः भवति ।
यथा

| उपसर्गः | धातुः | प्रत्ययः | आदेशः | कृदन्ताव्ययम् |
|---|---|---|---|---|
| वि | लिख् | क्त्वा | ल्यप् | विलिख्य |
| उप | कृ | क्त्वा | ल्यप् | उपकृत्य |

©KTBS NOT TO BE REPUBLISHED

*****

**अभ्यासः**

## १. एकवाक्येन उत्तरत ।

1. कृदन्तं नाम किम् ?
2. कृदन्तं कथम् उत्पद्यते ?
3. कृदन्तं किं भवति ?

## २. संयोजयत ।

| | अ | आ |
|---|---|---|
| 1. | इच्छन् | शानच् प्रत्ययः |
| 2. | श्रुत्वा | क्त प्रत्ययः |
| 3. | बोधनीयः | क्त्वा प्रत्ययः |

4. शोभमानः शतृ प्रत्ययः

5. पठितः अनीयर् प्रत्ययः

## ३. कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

1. अहं पत्रं लिखन् अस्मि ।
2. देवी विराजमाना अस्ति ।
3. बालकेन पाठः पठितव्यः ।
4. अर्जुनः कर्णं दृष्ट्वा शिबिरं प्राविशत् ।
5. कृष्णः कालिङ्गसर्पात् जनान् रक्षितवान् ।
6. रजनी विज्ञानं ज्ञातुम् इच्छति ।
7. शिवेन लोकः रक्षितः ।
8. प्रणम्य शिरसा देवं गौरीपुत्रम् ।

## ४. समूहेतरपदं चित्वा लिखत ।

1. कृत्वा, गत्वा, विमृश्य, नत्वा ।
2. आनीतवान्, कृतवती, दत्तवान्, ज्ञातवान् ।
3. पठनीयः, ताडनीयः, करणीया, वध्यः ।
4. गच्छन्, हसन्, पठन्, ज्ञातुम् ।

## ५. चतुर्थं पदं लिखत ।

1. नत्वा – क्त्वा प्रत्ययः ; विमृश्य .................. ।
2. कर्तुम् – तुमुन् प्रत्ययः ; वन्दमानः .................. ।
3. ताडितः – क्त प्रत्ययः ; कृतवती .................. ।
4. उत्थाय – ल्यप् आदेशः ; पश्यन् .................. ।

NOT TO BE REPUBLISHED © KTBS

# कृदन्तानि

| धातुः | कृदन्ताव्ययानि | | | कृदन्तनामपदानि | | | | |
|---|---|---|---|---|---|---|---|---|
| | | | | वर्तमानकाले | भूतकाले | | विध्यर्थे | |
| | तुमुन् | क्त्वा | ल्यप् | शतृ / शानच् | क्तवतु | क्त | तव्यत् | अनीयर् |
| | 1 | 2 | 3 | 4 / 5 | 6 | 7 | 8 | 9 |
| | | | | परस्मै / आत्मने | कर्तरि | कर्मणि / भावे | कर्मणि / भावे | कर्मणि / भावे |
| गम् | गन्तुम् | गत्वा | आगत्य | गच्छत्/ न्ती/त् | गतवान्/ वती/वत् | गतः/ता | गन्तव्यः/ | गमनीयः/ |
| ಹೋಗು | ಹೋಗಲು | ಹೋಗಿ | ಬಂದು | ಹೋಗುತ್ತಾ | ಹೋದನು | ಹೋಗಲ್ಪಟ್ಟಿತು | ಹೋಗಬೇಕು | ಹೋಗಲ್ಪಡಬೇಕು |
| वद् | वक्तुम् | उक्त्वा | प्रोच्य | वदन् | उक्तवान् | उक्तः | वक्तव्य | वदनीयः |
| खाद् | खादितुम् | खादित्वा | प्रखाद्य | खादन् | खादितवान् | खादितः | खादितव्यः | खादनीयः |
| हस् | हसितुम् | हसित्वा | विहस्य | हसन् | हसितवान् | हसितः | हसितव्यः | हसनीयः |
| वन्द् | वन्दितुम् | वन्दित्वा | अनुवन्द्य | वन्दमानः | वन्दितवान् | वन्दितः | वन्दितव्यः | वन्दनीयः |
| लभ् | लब्धुम् | लब्ध्वा | प्रलभ्य | लभमानः | लब्धवान् | लब्धः | लब्धव्यः | लभनीयः |
| सेव् | सेवितुम् | सेवित्वा | संसेव्य | सेवमानः | सेवितवान् | सेवितः | सेवितव्यः | सेवनीयः |
| वर्ध | वर्धितुम् | वर्धित्वा | संवर्ध्य | वर्धमानः | वर्धितवान् | वर्धितः | वर्धितव्यः | वर्धनीयः |
| जी | जेतुम् | जित्वा | विजित्य | जयन् | जितवान् | जितः | जेतव्यः | जयनीयः |
| नम् | नन्तुम् | नत्वा | प्रणम्य | नमन् | नतवान् | नतः | नन्तव्यः | नमनीयः |
| भू | भवितुम् | भूत्वा | संभूय | भवन् | भूतवान् | भूतः | भवितव्यः | भवनीयः |
| कृ | कर्तुम् | कृत्वा | संस्कृत्य | कुर्वन् | कृतवान् | कृतः | कर्तव्यः | करणीयः |
| क्रीड् | क्रीडितुम् | क्रीडित्वा | विक्रीड्य | क्रीडन् | क्रीडितवान् | क्रीडितः | क्रीडितव्यः | क्रीडनीयः |

NOT TO BE REPUBLISHED @KTBS

## क्रियाकलापः

❊ वाक्यगतानि कृदन्तपदानि चित्वा प्रत्ययान् निर्दिशत ।

| वाक्यम् | कृदन्तम् | प्रत्ययः |
|---|---|---|
| अहं जनकेन सह गतवती । | | |
| विरामं दातुम् अनुमतिः नास्ति । | | |
| जनाः धन्यभावम् अनुभूतवन्तः । | | |
| अहं वञ्चिता सन्तोषात् । | | |
| गणेशः देवं नत्वा शालां गच्छति । | | |
| मया गद्यं पठितव्यम् । | | |
| लीलया पाठः पठनीयः । | | |
| रामः विश्रम्य गच्छति । | | |

@KTBS NOT TO BE REPUBLISHED

**प्रहेलिका**

**कुलालस्य गृहेऽप्यर्धं तदर्धं हस्तिनापुरे ।**
**लङ्कायामपि तद्युग्मं यो जानाति स पण्डितः ।।**

**उत्तरम् - कुम्भकर्णः**

षष्ठः पाठः

# जीवनयोगः

A3K3C7

'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्' इति उक्तिः महाभारतस्य विषयवैशाल्यं प्रदर्शयति । महाभारतस्य भीष्मपर्वणि विश्वविख्याता श्रीमद्भगवद्गीता अस्ति । व्यासविरचिते महाभारते युद्धसन्दर्भे भगवान् श्रीकृष्णः गीताद्वारा अर्जुनं जीवनयोगं बोधयति । भगवद्गीतायाः कर्मभक्तिज्ञानयोगानां प्रतिनिधिभूताः सारतमाः षट् श्लोकाः अत्र उद्धृताः ।

NOT TO BE REPUBLISHED © KSEEB



कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।।1।।

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसङ्ग्रहमेवापि संपश्यन् कर्तुमर्हसि ।।2।।

चतुर्विधा भजन्ते मां जनास्सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ।।3।।

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ।।4।।

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ।।5।।

श्रद्धावाँल्लभते ज्ञानं तत्परस्संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।।6।।

*****

## कविकाव्यपरिचयः



कविः – महर्षिः वेदव्यासः ।
कालः – द्वापरयुगम् ।
देशः – यमुनानदीद्वीपः ।
कृतयः – 1. अष्टादश पुराणानि ।
2. महाभारतम् ।
3. ब्रह्मसूत्राणि ।

कविविशेषः – व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ।।

©KTBS NOT TO BE REPUBLISHED

## अन्वयार्थः

1. **ते** = भवतः, **कर्मणि** = क्रियायाम् एव, **अधिकारः** = प्रक्रिया, **कदाचन** = कदा अपि, **फलेषु** = कर्मफलेषु, **मा** = अधिकारः नास्ति, **कर्मफलहेतुः** = क्रियाफलस्य स्वामी कारणं वा, **मा भूः** = भवान् न भवतु, **ते** = भवते, **अकर्मणि** = अक्रियायाम्, **सङ्गः** = आसक्तिः, **मा अस्तु** = न भवतु ।

**तात्पर्यम्**– मानवानाम् अधिकारः केवलं कर्मणि एव फलेषु न कदाचिदपि भवति । मानवः कर्मणः फलस्य स्वामी, कर्मणः कारणं वा नास्ति । किन्तु अकर्मणि आसक्तिः न भवतु ।

2. **जनकादयः** = जनकादयः पुरातनाः राजानः, **कर्मणा एव** = कर्ममार्गेण एव, **संसिद्धिम्** = कार्यसिद्धिम्, **आस्थिताः** = प्राप्तवन्तः, **अपि** = च, **लोकसङ्ग्रहम् एव** = जनानां मार्गदर्शनमेव, **संपश्यन्** = लक्ष्यीकुर्वन्, **कर्तुम्** = कार्यं कर्तुम्, **अर्हसि** = योग्यः भवसि ।

**तात्पर्यम्** – पुरा जनकादयः राजानः कर्मरताः स्वधर्मम् अनुसरन्तः यशः प्राप्नुवन् । एवं भवानपि जनानां मार्गदर्शनं, धर्मञ्च लक्ष्यीकृत्य एव स्वकर्म अनुसरतु।

3. **भरतर्षभ**= भारतपुङ्गव, **अर्जुन** = हे पार्थ, **चतुर्विधाः** = चतुःप्रकाराः, **सुकृतिनः** = पुण्यशालिनः, **मनुष्याः** = जनाः, **माम्** = मा, **भजन्ते** = सेवन्ते, **आर्तः** = दुःखी, **जिज्ञासुः** = ज्ञानाकांक्षी, **अर्थार्थी** = भोगापेक्षी, **ज्ञानी च** = पण्डितः अपि ।

**तात्पर्यम्** – हे भरतपुङ्गव अर्जुन! चतुर्विधाः पुण्यशालिनः मानवाः मां सेवन्ते । ते च दुःखी, ज्ञानाभिलाषी, ऐहिकभोगापेक्षी पण्डितः च ।

© KTBS NOT TO BE REPUBLISHED

4. **यः** = यः भक्तः, **भक्त्या** = प्रीत्या, **मे** = मह्यम्, **पत्रम्** = पर्णम्, **पुष्पम्** = कुसुमम्, **फलम्** = फलम्, **तोयम्** = सलिलम्, **प्रयच्छति** = प्रददाति, **भक्त्या** = प्रीत्या, **उपहृतम्** = दत्तम्, **प्रयतात्मनः** = शुद्धात्मनः तस्य भक्तस्य, **तत्** = तद्वस्तु, **अश्नामि** = स्वीकरोमि ।

**तात्पर्यम्** – शुद्धात्मा यः भक्तः मत्कृते प्रीत्या पर्णं, कुसुमं, फलं, जलं च यच्छति तदहम् आदरेण स्वीकरोमि ।

5. **इह** = अस्मिन् लोके, **ज्ञानेन सदृशम्** = ज्ञानेन समम्, **पवित्रम्** = पावनकरं वस्तु, **न विद्यते हि** = न वर्तते खलु, **कालेन** = कालान्तरे, **योगसंसिद्धः** = योगेन यशः प्राप्य, **आत्मनि** = हृदि एव, **स्वयम्** = स्वयम् एव, **तत्** = तत् ज्ञानम्, **विन्दति** = प्राप्नोति ।

**तात्पर्यम्** – लोकेऽस्मिन् ज्ञानसमं पवित्रं किमपि वस्तु नास्ति । मानवः योगसाधकः सन् काले सम्प्राप्ते स्वयम् अनुभवेन तत् ज्ञातुं शक्नोति ।

6. **श्रद्धावान्** =श्रद्धापूर्णः पुरुषः, **तत्परः**= आत्मचिन्तनपरः, **संयतेन्द्रियः**= जितेन्द्रियः, **ज्ञानम्**= ज्ञानम्, **लभते** = प्राप्नोति, **ज्ञानम्** = प्रज्ञानम्, **लब्ध्वा** = प्राप्य, **अचिरेण** = शीघ्रम्, **पराम्** = श्रेष्ठाम्, **शान्तिम्** = शान्तस्थितिम्, **अधिगच्छति** = प्राप्नोति।

**तात्पर्यम्** – श्रद्धावान् आत्मचिन्तनपरः जितेन्द्रियः च पुरुषः प्रज्ञानं लभते। सः तदनु ज्ञानं प्राप्य उत्कृष्टां शान्तिं शीघ्रमेव प्राप्नोति ।

*****

NOT TO BE REPUBLISHED @KTBS

## अभ्यासः

## १. एकवाक्येन उत्तरं लिखत ।

1. कः महाभारतं रचितवान् ?
2. भगवद्गीता महाभारतस्य कस्मिन् पर्वणि अस्ति ?
3. कतिविधाः जनाः देवं भजन्ते ?
4. त्रयः योगाः के ?
5. कः ज्ञानं लभते ?
6. केन सदृशं पवित्रं नास्ति ?

## २. रिक्तस्थानं पूरयत ।

1. कर्मण्येवाधिकारस्ते .................... कदाचन ।
2. ................. हि संसिद्धिमास्थिता जनकादयः ।
3. पत्रं पुष्पं फलं तोयं यो मे ............. प्रयच्छति ।
4. तत्स्वयं योगसंसिद्धः .................... विन्दति ।
5. ज्ञानं लब्ध्वा परां ............ अचिरेणाधिगच्छति ।

## ३. संयोजयत ।

| अ | आ |
|---|---|
| वेदव्यासः | पण्डितः |
| भगवद्गीता | अर्जुनः |
| श्रीकृष्णः | भीष्मपर्वणि |
| पार्थः | महाभारतम् |
| ज्ञानी | गीताचार्यः |

© KTBS NOT TO BE REPUBLISHED

## ४. विरुद्धपदं लिखत ।

1. सुकृतिनः  2. संयतेन्द्रियः  3. अचिरेण  4. सदृशम्

## ५. पर्यायपदानि लिखत ।

1. पुष्पम्  2. सलिलम्  3. पत्रम्  4. पवित्रम्

## ६. श्लोकतात्पर्यं लिखत ।

1. चतुर्विधा भजन्ते मां जनास्सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ।।

2. न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ।।

## ७. द्वित्रैः वाक्यैः उत्तरं लिखत ।

1. कतिविधाः जनाः देवं भजन्ते ? ते च के ?
2. कर्मणः विषये भगवतः अभिप्रायः कः ?

*****

### अवधेयांशः

**ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।**
**सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते ।।**
**क्रोधाद्भवति सम्मोहस्सम्मोहात् स्मृतिविभ्रमः।**
**स्मृतिभ्रंशात् बुद्धिनाशः बुद्धिनाशात् प्रणश्यति ।।**

© KTBS NOT TO BE REPUBLISHED

## क्रियाकलापः

✻ **भगवद्गीतायाः अष्टादश अध्यायानां नामानि लिखत ।**

**भगवद्गीता**

| | |
|---|---|
| 1. | |
| 2. | |
| 3. | |
| 4. | |
| 5. | |
| 6. | |
| 7. | |
| 8. | |
| 9. | |

| | |
|---|---|
| 10. | |
| 11. | |
| 12. | |
| 13. | |
| 14. | |
| 15. | |
| 16. | |
| 17 | |
| 18. | |

@KTBS NOT TO BE REPUBLISHED

✻ **कोष्टकगतधातूनां समुचितरूपैः वाक्यानि पूरयत ।**

1. बालिका पुस्तके ........................ । (लिख् – लोट्)
2. गुरवः कथाम् ........................... । (वद् – लट्)
3. बालकाः प्रतिदिनम् ..................... । (एध् – लोट्)
4. छात्रः पठितुं ........................... । (यत् – लोट्)

सप्तमः पाठः

# एकाग्रता

G2N5U3

स्वामी विवेकानन्दः देशभक्तः संन्यासी आसीत् । सः भारतस्य महिमानं विश्वस्तरे प्रादर्शयत् । अल्पे वयसि बहूनि महत्कार्याणि सः कृतवान् । एकाग्रता एव तस्य यशसः कारणम् आसीत् । तस्य एकाग्रतायाः वैशिष्ट्यं परिचाययितुम् एका घटना अत्र प्रदत्ता ।

एकदा स्वामी विवेकानन्दः मेरठ् नगरं गतवान् । विवेकानन्दाय पठनम् अतीव रोचते स्म । प्रतिदिनं सः स्वशिष्यम् अखण्डानन्दं पुस्तकं स्वीकर्तुं ग्रन्थालयं प्रेषयति स्म। पुस्तकं पठित्वा द्वितीयदिने पुस्तकं पुनः पुस्तकालयं प्रति प्रेषयति स्म ।




एकमासं यावत् एवमेव अभवत् । एतत् दृष्ट्वा ग्रन्थालयस्य ग्रन्थपालः अचिन्तयत् "एषः अखण्डानन्दः मां पीडयितुम् एव आगच्छति । अन्यथा एकेन दिनेन पुस्तकं कथं पठितुं शक्यते ?" इति ।

@KTBS NOT TO BE REPUBLISHED

अपरस्मिन् दिने यदा अखण्डानन्दः पुस्तकं स्वीकर्तुं ग्रन्थालयम् आगतवान्, तदा ग्रन्थपालः कोपेन अपृच्छत् "भोः, एकमासात् पश्यामि । भवान् प्रतिदिनं पुस्तकं स्वीकरोति, द्वितीये दिने प्रतिददाति च । पुस्तकं पठति उत केवलं पृष्ठम् एव परिवर्तयति ? गच्छ, अद्य अहं पुस्तकं न दास्यामि" इति।



अखण्डानन्दः विवेकानन्दः

अखण्डानन्दः एतत् सर्वं विवेकानन्दम् अकथयत् । अपरस्मिन् दिने स्वामी विवेकानन्दः स्वयं ग्रन्थालयम् अगच्छत् । तत्र ग्रन्थपालम् अकथयत् "भोः मित्र ! अखण्डानन्दः प्रतिदिनम् एकं पुस्तकं मम निमित्तं स्वीकरोति स्म । मया एतानि सर्वाणि पुस्तकानि पठितानि । यदि भवान् इच्छति तर्हि पठितेभ्यः पुस्तकेभ्यः किमपि प्रष्टुं शक्नोति" इति ।

एषः सत्यं वदति उत असत्यम् इति परीक्षितुं ग्रन्थपालः पुस्तकेभ्यः कांश्चन प्रश्नान् अपृच्छत् । विवेकानन्दः सर्वेषां प्रश्नानाम् उत्तराणि अयच्छत्। न केवलम् उत्तराणि, अपि तु तस्य विषयस्य उल्लेखः कस्मिन् प्रसङ्गे कस्मिन् पृष्ठे कृतः अस्ति इत्यपि विवरणं क्रमशः अयच्छत् ।

विवेकानन्दस्य मेधावितां दृष्ट्वा ग्रन्थपालः आश्चर्यचकितः जातः । सः स्वस्य अपि च विवेकानन्दस्य स्मरणशक्तेः भेदं विवेकानन्दम् अपृच्छत् । तदा विवेकानन्दः अकथयत् "एकाग्रता पठनार्थम् आवश्यकी वर्तते । मनसः एकाग्रता एव अस्माकं कार्येषु गतिं वर्धयितुं शक्नोति" इति । अनेन प्रकारेण विवेकानन्दः एकाग्रतायाः महत्त्वम् अकथयत् ।

*****

©KTBS NOT TO BE REPUBLISHED

## अभ्यासः

## १. एकवाक्येन उत्तरत ।

1. स्वामी विवेकानन्दः कुत्र गतवान् ?
2. विवेकानन्दः स्वशिष्यं कुत्र प्रेषयति स्म ?
3. ग्रन्थपालः कां दृष्ट्वा आश्चर्यचकितः जातः ?
4. पठनार्थं का आवश्यकी ?
5. विवेकानन्दस्य शिष्यः कः ?

## २. रिक्तस्थानं पूरयत ।

1. विवेकानन्दाय .......................... अतीव रोचते स्म ।
2. अखण्डानन्दः पुस्तकं स्वीकर्तुं ................. आगतवान् ।
3. ग्रन्थपालः स्वस्य अपि च विवेकानन्दस्य स्मरणशक्तेः........ अपृच्छत्।
4. एकाग्रता अस्माकं कार्येषु ......................... वर्धयति।

## ३. लिङ्गविभक्तिवचनानि लिखत ।

1. ग्रन्थालयः 2. एकाग्रतायाः 3. पुस्तकेभ्यः 4. प्रश्नान्

## ४. लकारपुरुषवचनानि लिखत ।

1. प्रेषयति 2. अपृच्छत् 3. अयच्छत् 4. गच्छ

## ५. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

1. अखण्डानन्दः 2. पुस्तकालयः
3. आश्चर्यचकितः 4. प्रतिदिनम्

© KTBS NOT TO BE REPUBLISHED

## ६. यथानिर्देशम् उत्तरं लिखत ।

1. “गच्छ अद्य अहं पुस्तकं न दास्यामि”
   कः पाठः ? कः अवदत् ? कम् अवदत् ?
2. “मया एतानि सर्वाणि पुस्तकानि पठितानि”
   कः पाठः ? कः अवदत् ? कम् अवदत् ?

## ७. द्वित्रैः वाक्यैः उत्तरं लिखत ।

1. ग्रन्थालयस्य ग्रन्थपालः किम् अचिन्तयत् ?
2. एकाग्रतायाः विषये विवेकानन्दः किम् अवदत् ?

*****

**अवधेयांशः**

NOT TO BE REPUBLISHED @KTBS

***लृट् लकारः परस्मैपदम् - खेल् धातुः (ಆಡು/To Play)**

| | **ए.व.** | **द्वि.व.** | **ब.व.** |
|---|---|---|---|
| प्र.पु. | खेलिष्यति | खेलिष्यतः | खेलिष्यन्ति |
| म.पु. | खेलिष्यसि | खेलिष्यथः | खेलिष्यथ |
| उ.पु. | खेलिष्यामि | खेलिष्यावः | खेलिष्यामः |

*** लृट् लकारः आत्मनेपदम् - सेव् धातुः (ಸೇವೆ ಮಾಡು/To Serve)**

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | सेविष्यते | सेविष्येते | सेविष्यन्ते |
| म.पु. | सेविष्यसे | सेविष्येथे | सेविष्यध्वे |
| उ.पु. | सेविष्ये | सेविष्यावहे | सेविष्यामहे |

## ✻ लङ् लकारः परस्मैपदम् - लिख् धातुः (ಬರೆ/To Write)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | अलिखत् | अलिखताम् | अलिखन् |
| म.पु. | अलिखः | अलिखतम् | अलिखत |
| उ.पु. | अलिखम् | अलिखाव | अलिखाम |

## ✻ लङ् लकारः आत्मनेपदम् - सेव् धातुः (ಸೇವೆಮಾಡು/To Serve)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | असेवत | असेवताम् | असेवन्त |
| म.पु. | असेवथाः | असेवथाम् | असेवध्वम् |
| उ.पु. | असेवे | असेवावहि | असेवामहि |

✻------------------✻------------------✻

©KTBS NOT TO BE REPUBLISHED

## क्रियाकलापः

### ✻ वाक्यदोषान् परिहृत्य शुद्धं वाक्यं मञ्जूषायां लिखत ।

1. आचार्याः छात्रान् बोधयामः । [ ]
2. नृपः प्रजाः परिपालयन्ति । [ ]
3. यूयं प्रश्नोत्तराणि लिखन्तु । [ ]
4. शारदा गृहकार्यं करिष्यसि । [ ]

### ✻ वाक्यानि भविष्यत्काले परिवर्त्य मञ्जूषायां लिखत ।

1. अहं प्रभाते सूर्यं नमामि । [ ]
2. सः उत्तराणि लिखति । [ ]
3. जन्तवः वने राजन्ते । [ ]
4. त्वं गुरुं वन्दसे । [ ]

B9H9S4

अष्टमः पाठः

# समासः

अर्थानुगुणं पदानां संक्षेपः समासः। येन वाक्येन समस्तपदस्य विवरणं क्रियते तत् विग्रहवाक्यम् । अत्र बहुव्रीहिः अव्ययीभावः इति समासद्वयं प्रदत्तम् ।

**समासः**

**तत्पुरुषः** | **द्वन्द्वः** | **बहुव्रीहिः** | **अव्ययीभावः**

@KTBS
NOT TO BE REPUBLISHED

## १. बहुव्रीहिसमासः

लक्षणम् – 'अन्यपदार्थप्रधानः बहुव्रीहिः'। बहुव्रीहिसमासे भेदद्वयम् अस्ति।

### १. समानाधिकरणबहुव्रीहिः -

समासघटकानां पूर्वोत्तरपदानां विभक्तिः समाना चेत् समानाधिकरणबहुव्रीहिः ।

उदाहरणानि –

| विग्रहवाक्यम् | समस्तपदम् | अर्थः |
|---|---|---|
| प्राप्तः आनन्दः यं सः | प्राप्तानन्दः | बालकः |
| अधीतं व्याकरणं येन सः | अधीतव्याकरणः | पण्डितः |
| महत् बलं यस्य सः | महाबलः | शिवः |
| लम्बम् उदरं यस्य सः | लम्बोदरः | गणेशः |

## २. व्यधिकरणबहुव्रीहिः -

समासघटकानां पूर्वोत्तरपदानां विभक्तिः विभिन्ना चेत् व्यधिकरणबहुव्रीहिः ।

उदाहरणानि –

| विग्रहवाक्यम् | समस्तपदम् | अर्थः |
|---|---|---|
| शूलं पाणौ यस्य सः | शूलपाणिः | शिवः |
| चक्रं पाणौ यस्य सः | चक्रपाणिः | कृष्णः |
| पद्मं नाभौ यस्य सः | पद्मनाभः | विष्णुः |
| चन्द्रः शेखरे यस्य सः | चन्द्रशेखरः | शिवः |

## २. अव्ययीभावसमासः

**लक्षणम् -** 'पूर्वपदार्थप्रधानः अव्ययीभावः'। अव्ययीभावे प्रायः पूर्वपदम् अव्ययं भवति। समस्तपदं नपुंसकलिङ्गस्य प्रथमैकवचनवत् भवति ।

उदाहरणानि –

| विग्रहवाक्यम् | समस्तपदम् |
|---|---|
| क्षणं क्षणं | प्रतिक्षणम् |
| दिनं दिनं | प्रतिदिनम् |
| वृक्षस्य समीपम् | उपवृक्षम् |
| विधिम् अनतिक्रम्य | यथाविधि |
| रूपस्य योग्यम् | अनुरूपम् |
| विघ्नानाम् अभावः | निर्विघ्नम् |
| मुक्तेः पर्यन्तं | आमुक्ति |

*****

© KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. एकवाक्येन उत्तरत ।

1. समासः नाम कः ?
2. विग्रहवाक्यं नाम किम् ?
3. बहुव्रीहिसमासः कतिविधः ?
4. अव्ययीभावसमासे प्रायः पूर्वपदं किं भवति ?

### २. रिक्तस्थानं पूरयत ।

1. ................................... प्रधानः बहुव्रीहिः ।
2. ................................... प्रधानः अव्ययीभावः ।
3. पूर्वोत्तरपदानां विभक्तिः समाना चेत् ........... बहुव्रीहिः ।
4. पूर्वोत्तरपदानां विभक्तिः विभिन्ना चेत् .......... बहुव्रीहिः ।

### ३. समूहेतरपदं चित्वा लिखत ।

1. यथाविधि, अनुरूपम्, आमुक्ति, चक्रपाणिः ।
2. प्राप्तानन्दः, पद्मनाभः, प्रतिदिनं, शूलपाणिः ।
3. महाबलः, शूलपाणिः, पद्मनाभः, चन्द्रशेखरः ।

### ४. चतुर्थपदं लिखत ।

1. उत्तरपदार्थप्रधानः – तत्पुरुषः ; अन्यपदार्थप्रधानः .............. ।
2. उभयपदार्थप्रधानः – द्वन्द्वः ; पूर्वपदार्थप्रधानः ................... ।
3. निर्विघ्नम् – अव्ययीभावः ; महाबलः ......................... ।
4. चन्द्रशेखरः – बहुव्रीहिः ; प्रतिक्षणम् ......................... ।

© KTBS NOT TO BE REPUBLISHED

## ५. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

1. अधीतव्याकरणः   2. शूलपाणिः   3. उपवृक्षम्   4. यथाविधि

## ६. समस्तपदानि लिखित्वा समासनाम लिखत ।

1. लम्बम् उदरं यस्य सः   2. दिनं दिनं

3. महत् बलं यस्य सः   4. विघ्नानाम् अभावः

*****

### अवधेयांशः

| समासः | लक्षणम् | उदाहरणम् |
|---|---|---|
| तत्पुरुषसमासः | उत्तरपदार्थप्रधानः | रामदूतः |
| कर्मधारयसमासः | विशेषणप्रधानः | नीलोत्पलम् |
| द्विगुसमासः | सङ्ख्यापूर्वः | पञ्चवटी |
| द्वन्द्वसमासः | उभयपदार्थप्रधानः | फलपुष्पम् |
| अव्ययीभावसमासः | पूर्वपदार्थप्रधानः | यथाशक्ति |
| बहुव्रीहिसमासः | अन्यपदार्थप्रधानः | चक्रपाणिः |

NOT TO BE REPUBLISHED @KTBS

*-----------------*-----------------*

### क्रियाकलापः

*** कोष्टकस्थपदैः विग्रहवाक्यं पूरयित्वा समस्तपदं चित्वा समासनाम लिखत।**

**शक्तिम्, बलम्, लोचनानि, धनम्, विशाले, वाहनम्, समानम्, समीपम्, उदरम्, पुरुषः, मार्गस्य, इन्द्रियाणि**

| विग्रहवाक्यम् | समस्तपदम् | समासः |
|---|---|---|
| 1. वृकस्य उदरम् इव .............. यस्य सः। | | |
| 2. प्रकृष्टं ......................... यस्य सः। | | |
| 3. जितानि ......................... येन सः। | | |
| 4. ......................... उदरं यस्य सः। | | |
| 5. त्रीणि ................... यस्य सः। | | |
| 6. निर्गतं ................ यस्मात् सः। | | |
| 7. वीरः ................ यस्मिन् सः। | | |
| 8. ............... अक्षिणी यस्याः सा। | | |
| 9. मूषकः .................यस्य सः। | | |
| 10. गृहस्य ..........................। | | |
| 11. ..................... अनतिक्रम्य। | | |
| 12. ........................... मध्ये। | | |

**प्रबलः, यथाशक्ति, जितेन्द्रियः, उपगृहम्, त्रिलोचनः, निर्धनः, सोदरः, विशालाक्षी, मूषकवाहनः, वीरपुरुषः, वृकोदरः, मध्येमार्गम्**

**प्रहेलिका**

**पर्वताग्रे रथो याति भूमौ तिष्ठति सारथिः ।**
**चलति वायुवेगेन पदमेकं न गच्छति ।।**
**उत्तरम् - कुलालस्य चक्रम्**

@KTBS NOT TO BE REPUBLISHED

नवमः पाठः

# इन्दुः क्षीरनिधाविव

Q6J8W9

अयं पद्यभागः रघुवंशस्य प्रथमसर्गात् उद्धृतः । अत्र कालिदासः सूर्यवंशस्य आदर्शप्रायस्य नृपस्य दिलीपस्य सद्गुणान् कीर्तयति । राजश्रेष्ठः दिलीपः क्षीरसागरे चन्द्रः इव समुद्भूतः इति कविः वर्णयति ।

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ।।1।।

रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ।।2।।

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुः इन्दुः क्षीरनिधाविव ।।3।।



@KTBS NOT TO BE REPUBLISHED

व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ।।4।।

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भ आरम्भसदृशोदयः ।।5।।

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।।6।।

स वेलावप्रवलयां परिखीकृतसागराम् ।
अनन्यशासनामुर्वीं शशासैकपुरीमिव ।।7।।

*****

## कविकाव्यपरिचयः



**कविः** – कालिदासः।

**कालः** – क्रिस्ताब्दः प्रथमं चतुर्थं पञ्चमं वा शतकम् ।

**देशः** – जन्मस्थानं काश्मीरः। वासस्थानम् उज्जयिनी ।

**कृतयः** – महाकाव्यद्वयम् –1. रघुवंशम्
2. कुमारसम्भवम्।

**खण्डकाव्यद्वयम्** – 1. ऋतुसंहारः 2. मेघदूतम् ।

नाटकानि – 1. अभिज्ञानशाकुन्तलम्
2. मालविकाग्निमित्रम् 3. विक्रमोर्वशीयम् ।

**कविविशेषः** – पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः ।
अद्यापि तत्तुल्यकवेरभावात् अनामिका सार्थवती बभूव ।।

©KTBS NOT TO BE REPUBLISHED

## अन्वयार्थः

1. **शैशवे** = बाल्यकाले, **अभ्यस्तविद्यानाम्** = अधीतविद्यानाम्, **यौवने** = तारुण्यसमये, **विषयैषिणाम्** = प्रापञ्चिकविषयसुखेच्छुकाणाम्, **वार्धके** = वृद्धावस्थायाम्, **मुनिवृत्तीनाम्** = ऋषितुल्यजीवनानाम्, **अन्ते** = अवसानकाले, **योगेन** = भगवतः ध्यानेन, **तनुत्यजाम्** = शरीरत्यागं कुर्वताम् ।

**तात्पर्यम्** – रघुवंशीयाः राजानः बाल्यकाले एव अधीतशास्त्राः, यौवने गृहस्थाश्रमिणः भूत्वा धर्मनिरताः, वार्धके ऋषितुल्यजीवनं कुर्वन्तः, जीवनान्ते योगमार्गेण च भौतिकदेहं त्यजन्ति स्म ।

2. **तनुवाग्विभवः अपि** = अल्पवाक्कौशलसम्पन्नः चेदपि अहं कालिदासः, **तद्गुणैः** = रघुकुलचक्रवर्तीनां चरितैः, **कर्णम्** = श्रवणेन्द्रियम्, **आगत्य** = प्राप्य, **चापलाय** = चपलगुणात्, **प्रचोदितः सन्** = प्रभावितः भूत्वा, **रघूणाम्** = रघुवंशराजानाम्, **अन्वयम्** = वंशचरितम्, **वक्ष्ये** = वदामि ।

**तात्पर्यम्** – रघुवंशीयाः राजानः गुणसम्पन्नाः, अहं तु केवलम् अल्पज्ञः चेदपि तेषां गुणैः आकृष्टः सन् तेषां वंशानुचरितं संक्षेपेण कथयितुम् उत्साहपूर्णोऽस्मि।

3. **शुद्धिमति** = पवित्रे, **तदन्वये** = तस्मिन् रघुवंशे, **शुद्धिमत्तरः** = अतीव परिशुद्धः, **दिलीपः इति** = दिलीपः नाम, **राजेन्दुः** = राजश्रेष्ठः, **क्षीरनिधौ** = क्षीरसागरे, **इन्दुः इव** = चन्द्रः इव, **प्रसूतः** = जननं प्राप्तवान् ।

© KTBS NOT TO BE REPUBLISHED

**तात्पर्यम्** – इक्ष्वाकुवंशः पूर्वमेव अत्यन्तं शुद्धः आसीत् । तं वंशम् इतोऽपि शुद्धं कर्तुं दिलीपः इति राजश्रेष्ठः क्षीरसागरे चन्द्रः इव सञ्जातः ।

4. **व्यूढोरस्कः** = विशालवक्षस्थलः, **वृषस्कन्धः** = वृषभस्य इव बलिष्ठभुजवान्, **शालप्रांशुः** = शालवृक्षः इव उन्नतः, **महाभुजः** = आजानुबाहुः, **आत्मकर्मक्षमम्** = स्वकार्यं कर्तुं समर्थम्, **देहम्** = शरीरम्, **क्षात्रः धर्मः इव** = मूर्तिमान् क्षत्रियधर्मः **इव आश्रितः** = प्राप्तः आसीत्।

**तात्पर्यम्** – सः दिलीपः विशालवक्षस्थलः धीरः बलिष्ठः च आसीत् । आजानुबाहुः भूत्वा शालवृक्षः इव उन्नतः असीत् । स्वकीयक्षत्रियधर्मस्य पालनार्थं समर्थं देहं प्राप्य मूर्तिमान् क्षात्रधर्मः इव आसीत् ।

5. **आकारसदृशप्रज्ञः** = रूपानुगुणबुद्धिमान्, **प्रज्ञया** = बुद्ध्या अनुगुणम्, **सदृशागमः** = शास्त्रज्ञः, **आगमैः** = शास्त्रज्ञानानुगुणम्, **सदृशारम्भः** = कार्यासक्तः, **आरम्भसदृशोदयः** = कार्यानुगुणं फलवान् आसीत् ।

**तात्पर्यम्** – तस्य आकारानुसारं प्रज्ञा, प्रज्ञया तुल्यं शास्त्रज्ञानं, शास्त्रज्ञानानुगुणं कार्याणि, कार्यानुगुणं फलं च शृङ्खलया दिलीपः प्राप्नोति स्म ।

6. **सः** = दिलीपः, **प्रजानाम्** = प्रजावर्गस्य, **भूत्यर्थम् एव** = सुखार्थम् एव, **ताभ्यः** = प्रजाभ्यः, **बलिम्** = शुल्कम्, **अग्रहीत्** = स्वीकृतवान्, **रविः** = सूर्यः, **सहस्रगुणम्** = सहस्रगुणकं जलम्, **उत्स्रष्टुम्** = प्रत्यर्पयितुम्, **रसम्** = जलम्, **आदत्ते** = स्वीकरोति, **हि** = खलु ।

**तात्पर्यम्** – केवलं प्रजानां हितमेव वाञ्छन् दिलीपः प्रजाभ्यः शुल्कादिकं स्वीकरोति स्म । यथा सूर्यः भूमिस्थं जलं स्वीकृत्य वृष्टिरूपेण सहस्रगुणकं जलं भूमिं प्रत्यर्पयति तथा तस्य व्यवहारः आसीत्।

© KTBS NOT TO BE REPUBLISHED

7. **सः** = दिलीपः, **वेलावप्रवलयाम्** = समुद्रतरङ्गनिर्मितदुर्गप्राकाराम्, **परिखीकृतसागराम्** = मेखलीकृतसागराम्, **अनन्यशासनाम्** = अन्यनृपैः शासितुम् अशक्याम्, **उर्वीम्** = भूमिम्, **एकपुरीमिव** = एकं नगरमिव, शशास = पालितवान्।

**तात्पर्यम्** – सः दिलीपः समुद्रतरङ्गनिर्मितदुर्गप्राकारां, सागरतटमेव परिखा इव धृताम्, अन्यनृपेण शासितुम् अशक्याम्, भूमिम् एकनगरम् इव परिपालितवान् ।

*****

## अभ्यासः

## १. एकवाक्येन उत्तरत ।

1. के शैशवे अभ्यस्तविद्याः आसन् ?
2. तनुवाग्विभवः कः ?
3. कः इन्दुः क्षीरनिधाविव प्रसूतः ?
4. दिलीपः कः इव प्रांशुः आसीत् ?
5. दिलीपः भूमिं काम् इव शशास ?

## २. रिक्तस्थानं पूरयत ।

1. वार्धके ..................... ।
2. इन्दुः ....................... ।
3. .............. धर्म इवाश्रितः ।
4. आदत्ते हि रसं .............. ।
5. ................. प्रचोदितः ।

NOT TO BE REPUBLISHED @KTBS

## ३. पर्यायपदं लिखत ।

1. देहः  2. इन्दुः  3. रविः  4. पुरी

## ४. सन्धिं विभज्य नाम लिखत ।

1. भूत्यर्थं  2. योगेनान्ते  3. तदन्वये  4. राजेन्दुः

## ५. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

1. व्यूढोरस्कः  2. क्षीरनिधिः  3. महाभुजः  4. सदृशारम्भः

## ६. श्लोकतात्पर्यं कर्णाटकभाषया आङ्ग्लभाषया वा लिखत ।

1. शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ।।

2. आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भ आरम्भसदृशोदयः ।।

NOT TO BE REPUBLISHED © KTBS

## ७. द्वित्रैः वाक्यैः उत्तरं लिखत ।

1. रघुवंशीयराजाः कथम् आसन् ?
2. कीदृशीम् उर्वीं दिलीपः एकपुरीमिव शशास ?

## ८. कर्णाटकभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।

1. दिलीपः कीदृशः राजा आसीत् इति वर्णयत ।
2. दिलीपस्य शासनपद्धतिं विवृणुत ।

*****

## अवधेयांशः

### पञ्चमहाकाव्यानि

| कविः | महाकाव्यम् |
|---|---|
| कालिदासः | रघुवंशम्, कुमारसम्भवम् |
| माघः | शिशुपालवधम् |

| कविः | महाकाव्यम् |
|---|---|
| भारविः | किरातार्जुनीयम् |
| श्रीहर्षः | नैषधीयचरितम् |

### क्रियाकलापः

* **मञ्जूषायां प्रदत्तैः समुचितपदैः रिक्तस्थानानि पूरयत ।**

| | |
|---|---|
| शैशवे | |
| | यौवने |
| वार्धके | |
| | प्रज्ञा |
| आरम्भः | |
| | उदयः |

**अभ्यस्तविद्याः, आकारसदृशी, विषयैषिणः, आगमसदृशः, मुनिवृत्तयः, आरम्भसदृशः**

@KTBS NOT TO BE REPUBLISHED

दशमः पाठः

# कारकम्

U7A9D2

भाषाप्रयोगकौशलसम्पादनाय वर्णपदवाक्यज्ञानम् अत्यावश्यकम्। एतेषां सहसम्बन्धाभिज्ञानाय विभक्तिकारकयोः ज्ञानं सहकरोति । कारकाणां ज्ञानेन विना वाक्यप्रयोगः दुष्करः। अतः कारकाणां परिचयः अत्र सङ्क्षेपेण प्रदत्तः ।

वाक्येषु प्रधानतया कर्तृकर्मक्रियापदानि भवन्ति । अत्र यत् पदं क्रियापदेन सह अन्वयं प्राप्नोति तत् पदं कारकम् इत्युच्यते। अथवा यत् पदं क्रियां जनयति तत् कारकं भवति । यथा – 'बालकः पठति' इत्यत्र पठति इति क्रियापदम्। बालकः अत्र पठनस्य कर्ता। अत्र बालकः एव क्रियां जनयति। अतः तत् पदं कारकं भवति। संस्कृते षट् कारकाणि सन्ति। एतानि कारकाणि विभक्तिभिः एव प्रोच्यन्ते।

© KTBS NOT TO BE REPUBLISHED

| कारकाणि | विभक्तयः | उदाहरणानि |
|---|---|---|
| 1. कर्तृकारकम् | प्रथमा | बालकः पठति |
| | तृतीया | बालकेन पठ्यते |
| | षष्ठी | बालकस्य पठनम् |
| 2. कर्मकारकम् | द्वितीया | श्लोकं लिखति |
| | प्रथमा | श्लोकः लिख्यते |
| | षष्ठी | श्लोकस्य लेखनम् |
| 3. करणकारकम् | तृतीया | कन्दुकेन क्रीडति |

| | | |
|---|---|---|
| 4. सम्प्रदानकारकम् | चतुर्थी | मित्राय ददाति |
| 5. अपादानकारकम् | पञ्चमी | वृक्षात् पतति |
| 6. अधिकरणकारकम् | सप्तमी | विद्यालये पठति |

सर्वकारकयुतम् एकं वाक्यम् अत्र उदाहरणरूपेण प्रदत्तम् । तद्यथा –

**रमेशः पुस्तकं हस्तेन मित्राय स्यूतात् विद्यालये ददाति**




@KTBS
NOT TO BE REPUBLISHED

**अवधेयांशः**

**कारकाभ्यासः**

1. बालकः ददाति ।
2. बालकः पत्रं ददाति।
3. बालकः पत्रं हस्तेन ददाति।
4. बालकः पत्रं हस्तेन मित्राय ददाति।
5. बालकः पत्रं हस्तेन मित्राय स्यूतात् ददाति।
6. बालकः पत्रं हस्तेन मित्राय स्यूतात् विद्यालये ददाति।

## अभ्यासः

### १. अधस्तनवाक्येषु विद्यमानानि कारकाणि लिखत ।

1. छात्रः पाठं पठति।
2. पुत्राय जनकः धनं ददाति ।
3. गृहे भोजनं खादामः ।
4. सा पत्रं लेखन्या लिखति ।
5. हस्तात् सुधाखण्डः पतति ।

### २. योजयत ।

| | | |
|---|---|---|
| 1. | हस्तेन | सम्प्रदानम् |
| 2. | पादपात् | कर्ता |
| 3. | रामाय | करणम् |
| 4. | शालायाम् | अपादानम् |
| 5. | सुरेशः | अधिकरणम् |

* * * * *

@KTBS NOT TO BE REPUBLISHED

एकादशः पाठः

# अलङ्कारः

C4A3T4

मनुष्यस्य आत्मा, शरीरम्, इन्द्रियाणि, अलङ्करणवस्तूनि यथा भवन्ति तथैव काव्यस्य रसः, गुणाः, अलङ्काराः च भवन्ति । येन काव्यस्य सौन्दर्यम् अभिवर्ध्यते सः अलङ्कारः। अयं च अलङ्कारः शब्दालङ्कारः अर्थालङ्कारः इति द्विविधः।

1. **शब्दालङ्कारः** – यत्र शब्दैः काव्यस्य सौन्दर्यं वर्धते तत्र शब्दालङ्कारः। यथा-

नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजम्
अचिन्त्यरूपमन्तहीनमन्तरायकृन्तनम् ।
हृदन्तरे निरन्तरं वसन्तमेव योगिनाम्
तमेकदन्तमेव तं विचिन्तयामि सन्ततम् ।।

2. **अर्थालङ्कारः** – यत्र अर्थविशेषैः काव्यस्य सौन्दर्यं वर्धते तत्र अर्थालङ्कारः । यथा उपमारूपकादयः अर्थालङ्काराः । पाठेऽस्मिन् चतुर्णाम् अर्थालङ्काराणां परिचयः क्रियते ।

## १. उपमालङ्कारः

**लक्षणम् – 'उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः'**

विवरणम् – यत्र उपमानोपमेययोः समानः धर्मः वर्ण्यते तत्र उपमालङ्कारः। उपमालङ्कारे चत्वारः अंशाः भवन्ति ।

1. उपमानम् 2. उपमेयम् 3. समानधर्मः 4. उपमावाचकशब्दः

**उदाहरणम्** – 'मुखं चन्द्रः इव सुन्दरम्'।

**समन्वयः** – अत्र मुखम् उपमेयम् । चन्द्रः उपमानम् । अत्र मुखचन्द्रयोः मध्ये समानधर्मः सौन्दर्यम् अस्ति । इव इति उपमावाचकशब्दः । अतः अत्र उपमालङ्कारः ।

NOT TO BE REPUBLISHED ©TTBS

## २. रूपकालङ्कारः

**लक्षणम् - 'विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्**

**विवरणम्** – यत्र उपमानोपमेययोः मध्ये अभेदः वर्ण्यते तत्र रूपकालङ्कारः ।

**उदाहरणम्** – 'करारविन्देन पदारविन्दम्' ।

**समन्वयः** – अत्र करः उपमेयम् । अरविन्दम् उपमानम् । अत्र करारविन्दयोः मध्ये भेदः एव नास्ति । अभेदः एव वर्णितः । अतः अत्र रूपकालङ्कारः ।

*****

## अभ्यासः

### १. एकवाक्येन उत्तरत ।

1. अलङ्कारः नाम कः ?
2. अलङ्कारस्य भेदौ कौ ?
3. शब्दालङ्कारः नाम कः ?
4. अर्थालङ्कारः नाम कः ?
5. उपमालङ्कारे कति अंशाः भवन्ति ?

### २. रिक्तस्थानं पूरयत ।

1. उपमा यत्र .................. उल्लसति द्वयोः ।
2. विषय्यभेदताद्रूप्यरञ्जनं .................. यत् ।
3. ...................................... श्लेषः ।
4. ........................... यदैकस्यैव वस्तुनः ।

### ३. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत ।

1. सोमदत्तः अभिमन्युः इव शूरः ।
2. गगनं गगनाकारं सागरः सागरोपमः ।
3. मुखारविन्दे विनिवेशयन्तम् ।
4. कादम्बरीरसज्ञानाम् आहारोऽपि न रोचते ।

© KTBS NOT TO BE REPUBLISHED

द्वादशः पाठः

# छन्दः

I5G8P6

आचार्यः पिङ्गलः 'छन्दःशास्त्रम्' इति ग्रन्थं विरचितवान् । वेदवाङ्मयस्य षडङ्गेषु तृतीयम् अङ्गं छन्दः । अक्षरगणकं, मात्रागणकम् इति छन्दः द्विविधं वर्तते । अत्र चत्वारि छन्दांसि परिचीयन्ते ।

## १. अनुष्टुप्

**लक्षणम्** – **'अष्टवर्णा भवेयुर्हि प्रतिपादमनुष्टुभि ।'**

**विवरणम्** – अनुष्टुभि चत्वारः पादाः भवन्ति । प्रतिपादम् अष्टाक्षराणि भवन्ति ।
आहत्य द्वात्रिंशत् अक्षराणि भवन्ति ।

यथा – न हि ज्ञानेन सदृशम्
पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः
कालेनात्मनि विन्दति ।।

'जीवनयोगः' इति पद्यस्य सर्वे श्लोकाः अनुष्टुभि छन्दसि सन्ति ।

NOT TO BE REPUBLISHED @KTBS

## २. इन्द्रवज्रा

**लक्षणम्** – **'स्यादिन्द्रवज्रा यदि तौ जगौ गः'**

**विवरणम्** – यत्र एकस्मिन् पादे क्रमशः तगणः, तगणः, जगणः, गुरु, गुरु च भवन्ति तत्र इन्द्रवज्राछन्दः भवति ।

| | — —U | — —U | U —U | — | — |
|---|---|---|---|---|---|
| यथा - | सीतां वि | चेतुं प | थि चार | णा | नाम् । |
| | तगणः | तगणः | जगणः | गुरु | गुरु |

## ३. वसन्ततिलका

**लक्षणम्** - **'उक्ता वसन्ततिलका तभजा जगौ गः'**

**विवरणम्** - यत्र च श्लोके प्रतिपादं क्रमशः तगणः, भगणः, जगणः, जगणः, गुरु, गुरु च भवन्ति तत्र वसन्ततिलकाछन्दः भवति ।

| | _ _ U | _ U U | U _ U | U _ U | _ | _ |
|---|---|---|---|---|---|---|
| यथा - | सप्राण | एव व | सतीति | विचित्र | मे | तत् |
| | तगणः | भगणः | जगणः | जगणः | गुरु | गुरु |

## ४. मालिनी

**लक्षणम्** - **'ननमयययुतेयं मालिनी भोगिलोकैः'**

**विवरणम्** - यत्र श्लोके प्रतिपादं क्रमशः नगणः, नगणः, मगणः, यगणः, यगणः च भवन्ति तत्र मालिनीछन्दः भवति ।

| | U U U | U U U | _ _ _ | U _ _ | U _ _ |
|---|---|---|---|---|---|
| यथा - | मनसि | वचसि | काये पु | ण्यपीयू | षपूर्णाः । |
| | नगणः | नगणः | मगणः | यगणः | यगणः |

*****

NOT TO BE REPUBLISHED @KTBS

## अभ्यासः

## १. एकवाक्येन उत्तरत ।

1. छन्दःशास्त्रस्य कर्ता कः ?
2. अनुष्टुभि प्रतिपादं कति अक्षराणि भवन्ति ?
3. वसन्ततिलकावृत्ते के के गणाः भवन्ति ?
4. मालिनीवृत्ते के के गणाः भवन्ति ?
5. इन्द्रवज्रावृत्ते के के गणाः भवन्ति ?

## २. रिक्तस्थानं पूरयत ।

1. .................. भवेयुर्हि प्रतिपादमनुष्टुभि ।
2. स्यादिन्द्रवज्रा ................ तौ जगौ गः ।
3. उक्ता वसन्ततिलका ............. जगौ गः ।
4. ननमयययुतेयं ................. भोगिलोकैः ।

## ३. एतेषां श्लोकपादानां लक्षणं विलिख्य छन्दोनाम लिखत ।

1. कर्मण्येवाधिकारस्ते ।
2. प्रस्थादुदस्थात् प्रथमानवेगः ।
3. ज्योत्स्नां विनापि निवसेन्निशि शीतभानुः ।
4. निजहृदि विलसन्तः सन्ति सन्तः कियन्तः ।

NOT TO BE REPUBLISHED @KTBS

त्रयोदशः पाठः

# अनुवादः

J9T4U7

**✻ कर्णाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।**

1. पुरा भोजभूपालस्य सभायाम् अनेके कवयः आसन् । तेषामेकः कालिदासः नाम ।

2. आसीत् द्रोणो नाम प्रथितः धनुर्वेदाचार्यः । तस्य धनुर्वेदकौशलं दृष्ट्वा भीष्मः तं स्वनगरम् आनयत् ।

3. गोदावरीनदीतीरे विशालः शाल्मलीतरुः अस्ति । तत्र अनेके पक्षिणः निवसन्ति ।

4. वयं प्रतिदिनं शालां गच्छामः । तत्र संस्कृतमपि पठामः ।

**✻ संस्कृतेन अनुवादं कुरुत ।**

1. ಮಹಾಭಾರತದ ಭೀಷ್ಮ ಪರ್ವದಲ್ಲಿ ಭಗವದ್ಗೀತೆ ಇದೆ. ಇದನ್ನು ಶ್ರೀಕೃಷ್ಣನು ಅರ್ಜುನನಿಗೆ ಉಪದೇಶಿಸಿದನು.

   Bhagavadgita is in Bhishmaparva of Mahabharata. Lord Shree Krishna preached Gita to Arjuna

2. ನಗರದಲ್ಲಿ ಸುಂದರವಾದ ಉದ್ಯಾನವಿದೆ. ಆ ಉದ್ಯಾನದಲ್ಲಿ ವಿಶಾಲವಾದ ಸರೋವರವಿದೆ.

   There is a beautifull Garden in the city. There is a large lake in the garden.

3. ವಿದ್ಯಾರ್ಥಿಗಳು ಪ್ರತಿದಿನ ಶಾಲೆಗೆ ಹೋಗುತ್ತಾರೆ. ಶಾಲೆಯಲ್ಲಿ ಸಂಸ್ಕೃತ ಭಾಷೆಯನ್ನು ಕಲಿಯುತ್ತಾರೆ.

   Students go to the school every day. They learn Sanskrit language in the school.

NOT TO BE REPUBLISHED ©KTBS

4. ಇಂದು ರವಿವಾರ, ಶಾಲೆಗೆ ವಿರಾಮವಿದೆ. ನಾಳೆ ಸೋಮವಾರ, ನಾವು ಶಾಲೆಗೆ ಹೋಗುವೆವು.

Today is Sunday, it is a holiday. Tomorrow is Monday, we go to school.

5. ಆನೆಯು ಸಸ್ಯಹಾರಿ ಪ್ರಾಣಿ. ಅದು ಕಾಡಿನಲ್ಲಿ ವಾಸಿಸುತ್ತದೆ.

Elephant is a herbivores animal. It lives in the forest.

6. ಪಕ್ಷಿಗಳು ಗೂಡಿನಲ್ಲಿ ವಾಸಿಸುತ್ತವೆ. ಅವು ಆಕಾಶದಲ್ಲಿ ಹಾರುತ್ತವೆ.

Birds live in nest. They fly in the sky.

7. ಗಾಳಿಯು ಎಲ್ಲ ಕಡೆ ಇದೆ. ಗಾಳಿಯಿಲ್ಲದೆ ಪ್ರಾಣಿಗಳು ಬದುಕಲಾರವು.

Air is everywhere. Animals can't live without air.

8. ಭಾರತೀಯ ಪರಂಪರೆಯು ವಿಶಿಷ್ಟವಾಗಿದೆ. ಅದನ್ನು ಅನುಸರಿಸೋಣ.

Indian tradition is special. Let us follow this tradition.

@KTBS
NOT TO BE REPUBLISHED

*****

चतुर्दशः पाठः

# पत्राणि

## विरामपत्रम्

✻ **दिनद्वयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत।**

**सकाशात् -**

अक्षयः / अक्षता
'दशमकक्ष्या',
शारदाप्रौढशाला,
तुमकूरु ।

**सविधे -**

मान्यः मुख्योपाध्यायः,
शारदाप्रौढशाला,
तुमकूरु ।

मान्य,

**विषयः - विरामार्थं प्रार्थना ।**

अहम् उत्सवं द्रष्टुं पोषकैः साकं तिरुपतिक्षेत्रं गमिष्यामि । अतः दिनद्वयं शालां न आगमिष्यामि । अतः भवान् कृपया दिनद्वयं विरामं ददातु इति प्रार्थये ।

स्थलम् - तुमकूरु ।  भवतः विधेयः छात्रः/विधेया छात्रा
दिनाङ्कः - 3-7-2017  अक्षयः / अक्षता

NOT TO BE REPUBLISHED @KTBS

# कौटुम्बिकपत्रम्

## १. अध्ययनविषये मित्रं प्रति पत्रं लिखत ।

कुशलम् | श्रीः | धारवाड नगरम्

दिनाङ्कः - 6-9-2019

प्रियमित्र सादरं प्रणामाः ।

अहम् अत्र कुशलिनी । भवन्तः तत्र कुशलिनः इति भावये । मम अध्ययनं सम्यक् प्रचलति । आगामिनि मासे अर्धवार्षिकपरीक्षा भविष्यति । अतः सम्यक् पठामि । भवतः अध्ययनं कथं प्रचलति ? विरामे मम गृहम् आगच्छतु । पत्रं लिखतु ।

भवतः सखा/सखी

सुमुखः/सुप्रीता

@KTBS NOT TO BE REPUBLISHED

**पत्रसङ्केतः**

मुद्रा

**सविधे -**

सिद्धेश्वरः,
सिद्धगङ्गाप्रौढशाला,
मैसूरु ।

| | | | | | |
|---|---|---|---|---|---|
| 4 | 5 | 0 | 0 | 0 | 5 |

**सकाशात् -**

सुमुखः/सुप्रीता,
कर्नाटकप्रौढशाला,
धारवाड ।

| | | | | | |
|---|---|---|---|---|---|
| 5 | 5 | 0 | 0 | 0 | 5 |

## २. प्रवासार्थं धनं प्रेषयितुं पितरं प्रति पत्रं लिखत ।

कुशलम् श्रीः मङ्गलूरु नगरम्

दिनाङ्कः - 3-12-2019

पूज्यपितृचरणानां साष्टाङ्गं प्रणामाः ।

अहम् अत्र कुशली । भवन्तः अपि तत्र कुशलिनः इति मन्ये ।

मम अध्ययनं सम्यक् प्रचलति । अस्माकं शालातः छात्राः मुम्बै नगरं प्रति प्रवासार्थं गमिष्यन्ति । अहम् अपि गन्तुम् इच्छामि । अतः अनुमतिं दत्वा पञ्चशतं रूप्यकाणि प्रेषयन्तु इति सविनयं प्रार्थये ।

सर्वेभ्यः नमस्काराः

भवतः पुत्रः/पुत्री

पवनः/प्रभा

**पत्रसङ्केतः**

मुद्रा

**सविधे -**

चन्द्रमौलिः,
संख्या - 33, विनायकनगरम्,
बेङ्गलूरु ।

| 5 | 6 | 0 | 0 | 2 | 1 |
|---|---|---|---|---|---|

सकाशात् -
पवनः/प्रभा,
सर्वकारीयप्रौढशाला,
कुमटा ।

| 5 | 5 | 0 | 0 | 0 | 5 |
|---|---|---|---|---|---|

@KTBS NOT TO BE REPUBLISHED

पञ्चदशः पाठः

# प्रबन्धाः

## परिसरः

L7H6E9

इयं भूमिः, वायुमण्डलं, नद्यः, पर्वताः इत्यादयः परिसरः इति कथ्यन्ते। पूर्वम् अयं परिसरः शुद्धः, प्रशान्तः, समृद्धः च आसीत् । परन्तु इदानीं जनसंख्याबाहुल्यात् नगरीकरणात् परिसरमालिन्यं वर्धते ।

### परिसरसंरक्षणम्

वृक्षारोपणम् अधिकं कर्तव्यम् । कृषिभूमिं वसत्यर्थं न परिवर्तनीयम्। जलमालिन्यस्य वायुमालिन्यस्य च नियन्त्रणं करणीयम् । जनसंख्यास्फोटस्य नियन्त्रणं भवेत् । प्लास्टिक् इत्यादिवस्तूनाम् उपयोगः न करणीयः । व्यर्थवस्तूनां प्रक्षेपणापेक्षया रूपान्तरेण उपयोगः कर्तव्यः। परिसरसंरक्षणविषये छात्राणां विशेषकार्यागारः आयोजनीयः। एवं प्रकारेण परिसरसंरक्षणं करणीयम् ।

## सङ्गणकयन्त्रम्

मानवाः प्रगतिशीलाः, ते प्रत्यहं नूतनम् आविष्कारं कुर्वन्तः एव सन्ति । विशेषतः विज्ञानक्षेत्रे आविष्कृतम् अत्युपयुक्तं साधनमेव सङ्गणकयन्त्रम् । चार्ल्स् बाबेज् इति आङ्ग्लविज्ञानी इदं सङ्गणकयन्त्रम् अन्विष्टवान् ।

शिक्षणक्षेत्रे, वाणिज्यक्षेत्रे, दैनन्दिनव्यवहारे च अनुक्षणं विविधान् विषयान् अवगन्तुं संरक्षितुं च सङ्गणकयन्त्रद्वारा साध्यम् । अत्र दर्शनं श्रवणं च एकत्रैव भवति । तटित्पत्रद्वारा (ईमेल्) क्षणमात्रेण बहून् विषयान् प्रेषयितुं प्राप्तुं च शक्यते । अन्तर्जालं (इन्टर्नेट्) इति तु जगतः समस्तविषयान् क्षणार्धे दर्शयति । गृहे एव उपविश्य अपेक्षितविषयानां विवरणं ज्ञातुं सङ्गणकयन्त्रम् उपकारकम् अस्ति ।

©KTBS NOT TO BE REPUBLISHED

पूरकपाठः

# उभयभारती

अस्माकं भारतदेशे महान्तः ज्ञानिनः बहवः आसन् । तेषु काश्चन महिलाः अपि प्रसिद्धाः । तासु उभयभारती अपि अन्यतमा । एषा संस्कृताध्ययनं कृत्वा पण्डितैः सह शास्त्रार्थचिन्तनं करोति स्म। आदिशङ्कराचार्यैः सह एतया कृतं शास्त्रार्थचिन्तनं कथारूपेण अत्र प्रदत्तम् ।

मध्यप्रदेशे नर्मदानदीतीरे पूर्वं माहिष्मतीनामकं नगरम् आसीत् । तस्मिन् वेदज्ञाः शास्त्रज्ञाः साहित्यसङ्गीतादिकलानिष्णाताः बहवः निवसन्तः आसन् । अस्य नगरस्य वैशिष्ट्यं यत् जनानां सम्पर्कभाषा संस्कृतम् आसीत्। प्रख्यातः पण्डितः मण्डनमिश्रः अस्मिन् एव नगरे विराजमानः आसीत् । तस्य धर्मपत्नी एव उभयभारती।

एषा तु सकलविद्यापारङ्गता आसीत् । विशेषेण संस्कृतभाषायां शास्त्रेषु च पाण्डित्यं प्राप्तवती । प्रतिभासम्पन्ना एषा अहङ्कारं कदापि न प्रदर्शयति स्म । एकदा मण्डनमिश्रशङ्करभगवत्पादयोः मध्ये वेदान्तशास्त्रविषये महती चर्चा सम्पन्ना । प्रवृत्तिमार्गः एव श्रेष्ठः इति मण्डनमिश्रस्य वादश्चेत् निवृत्तिमार्गः एव श्रेष्ठः इति शङ्करभगवत्पादस्य प्रतिपादनम् आसीत् । परं तयोः पण्डितप्रकाण्डयोः वादे न्यायनिर्णयाय तत्रस्थः कोऽपि पण्डितः अग्रे नागतः।

तदा न्यायनिर्णयाय उभयभारती सभायाम् अध्यक्षस्थानम् अलङ्कृतवती । सप्ताहपर्यन्तं निरन्तरं शास्त्रार्थचिन्तनम् अनुवर्तितम् । अन्ते मण्डनमिश्रः पराजितः । तदा शङ्कराचार्यस्य जयम् अनङ्गीकुर्वाणा मण्डनमिश्रस्य अर्धाङ्गिनी उभयभारती तया सह अपि वादं कृत्वा पूर्णजयः प्राप्तव्यः इत्युक्त्वा स्वयं शास्त्रार्थचिन्तनम् अनुवर्तितवती । तयोः मध्ये विशेषतः अर्थशास्त्रस्य धर्मशास्त्रस्य मोक्षशास्त्रस्य च विषये संवादः सम्पन्नः । तस्याः गभीरप्रश्नानां

@KTBS NOT TO BE REPUBLISHED

समाधानाय सर्वशास्त्रविशारदः शङ्कराचार्यः अपि मासात्मकं कालं स्वीकृत्य उत्तरम् अवदन्। तदनु शङ्कराचार्यस्य असदृशं पाण्डित्यम् अवलोक्य मण्डनमिश्रः पूर्वप्रतिज्ञानुगुणं च संन्यासाश्रमं स्वीकृत्य तस्य शिष्यः अभूत्।

पत्युः संन्यासग्रहणेन अनन्यगतिका उभयभारती अपि स्वस्यै अपि सद्गतिं कल्पयितुं शङ्कराचार्यं प्रार्थितवती । तदा शङ्कराचार्येण यदि गुरुणा गोविन्दभगवत्पादेन संस्थापितस्य नर्मदा विश्वविद्यालयस्य कुलपतिः एषा भविष्यति तर्हि जीर्णावस्थाम् आपन्नः सः विश्वविद्यालयः पुनः उज्जीवनं प्राप्य जगति प्रसिद्धिं विन्दति इति मनसि विचिन्त्य भवती नर्मदाविश्वविद्यालयस्य कुलपतिः भवतु इत्युक्तम् ।

तच्छ्रुत्वा विनयादिसद्गुणसम्पन्ना उभयभारती तादृशम् उन्नतं स्थानम् अलङ्कर्तुं सङ्कोचं प्रकटितवती । तदा तस्याः शास्त्रपाण्डित्यम् व्यवहारकौशलं च निरूप्य शङ्कराचार्यः तस्यै कुलपतिस्थानं प्रदाय ताम् अनुगृहीतवान् । एवं सरस्वत्याः अपरावतारभूता च उभयभारती नर्मदाविश्वविद्यालयस्य कुलपतिः भूत्वा विद्यादानं कृतवती । भारतस्य आदर्शनारी सा अद्यापि प्रातस्स्मरणीया वर्तते ।

© KTBS NOT TO BE REPUBLISHED

## अभ्यासः

**१. उभयभारती भारतस्य आदर्शनारी इति विषयं सङ्गृह्य कर्णाटकभाषया आङ्ग्लभाषाया वा लिखत ।**

*****

# NOTE

@KTBS
NOT TO BE REPUBLISHED